नं० ५६६०९ — घ

श्री दुर्गाबीजाक्षरी

पत्राणि ७८

तन्त्रम्

संपूर्णम्

नं० ५६०८-घ 31

श्री दुर्गावीजोद्धारी (तन्त्रम्)

पत्राणि १८+६० = ७८ (संपूर्णम्)

~~नं० ११४३~~

नं० ५६०९-घ

श्री दुर्गाबीजाक्षरी: (तन्त्रम्)

~~पत्राणि १६~~

पत्राणि १८+६०=७८

(संपूर्णम्)

नं. ६९ ३-क

दुर्गा बीजाक्षरी-

CoG तन्त्राणि

लिपि-

5609

F-I 18

II 60

78.



ॐ श्रीगणेशाय नमः अथ प्रयोगान्तराणि कात्यायनीतन्त्रोक्तानि प्रतिश्लोकमाद्यं
तयोः ॐ मन्त्रजपेत्सिद्धिः १ अग्रे सर्वत्र श्लोकपदं मन्त्रोपलक्षणं सप्रणवमनुलोमव्याहृ
तित्रयमादौ अन्ते तु विलोमं तदित्येवं प्रतिश्लोकं कृत्वा शतावृत्तपाठेऽतिशीघ्रसिद्धिः २
प्रतिश्लोकमादौ ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः स नः पर्षदति दु
र्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः इत्यृचं पठेत्सर्वकामसिद्धिः ३ अपमृत्युवारणा
य त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनं उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् आ
दावन्ते च शतमित्यर्थः प्रतिश्लोकं तन्मन्त्रजप इत्यन्यत्र ४ प्रतिश्लोकं शूलेन पाहि नो देवि
पाहि खड्गेन चाम्बिके घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च पाठादपमृत्युनाशः अस्य के
वलस्यापि श्लोकस्य लक्षमयुतं सहस्रं शतं वा जपे अपमृत्युवारणं ५ प्रतिश्लोकं शरणा

गतदीनार्त्तपरित्राणपरायणे सर्वस्यार्त्तिहरे देवि नारायणि नमोऽस्तु ते श्लोकं पठेत्स

र्वकार्यसिद्धिः ६ प्रतिश्लोकं करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चा

पदः इत्यर्द्धं पठेत्सर्वकार्यसिद्धिः ७ स्वाभीष्टवरप्राप्तये एवं देव्या वरं लब्ध्वा सुरथः क्ष

त्रियर्षभः सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ८ सर्वापन्निवारणाय प्रतिश्लोकं

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि दारिद्र्य

दुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ग्रस्य केवलस्यापि

दुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ९ सर्वबाधाप्रशमनं त्रैलो

श्लोकस्य कार्यानुसारेण लक्षमयुतं सहस्रं शतं वा जपः ९ सर्वबाधाप्रशमनं त्रैलो

क्यस्याखिलेश्वरि एवमेव त्वया कार्यमस्मद्वैरिविनाशनं लक्षजपे प्रतिश्लोकं पाठे वा

श्लोकोक्तं फलं १० इत्थं यदा यदा बाधा दानवोत्था भविष्यति तदा तदावतीर्याहं क।

प्र० ९

(र)क्षाम्यरिसंहतयं श्लोकजपेमहामारीशांतिः ११ ततोवव्रेनृपोराज्यमविभ्रंश्यन्य
जन्मनि अत्रैवचनिजंराज्यंहतशत्रुवलंवलात् जपेपुनःस्वराज्यलाभः १२ हिनस्ति
दैत्यतेजांसिस्वनेनापूर्ययाजगत् साघंटापातुनोदेविपापेभ्योनःसुतानिच वालग्र
हशांतिः १३ आद्यावृत्तिमनुलोमेन ततोविपरीतक्रमेण द्वितीयामनुलोमेन तृ
तीयामित्येव मावृत्तित्रयेण शीघ्रंकार्यसिद्धिः १४ सर्वापन्निवारणाय दुर्गेस्मृता
हरसिभीतिमशेषजंतोःस्वस्थैःस्मृतामतिमतीवशुभांददासि १४ यदंतियच्चदू
रकेभयंविंदंतिमामिह पावमानवितज्जहि इत्यचंतदंतेदारिद्र्यदुःखेत्यर्द्धमेवंका
र्यानुसारेण लक्षमयुतंसहस्रंशतंवाजपः १५ कांसोस्मितांहिरण्यप्राकारामा
र्द्रांज्वलंतींतृप्तांतर्पयंतीम् पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं इत्यचंच

तिश्लोकंपठेत् लक्ष्मीप्राप्तिः १६ अनृणाअस्मिन्ननृणाःपरस्मिन् तृतीयेलोके
अनृणाआस्याम येदेवयानापितृयाणाश्चलोकाः सर्वान्पथोअनृणाआक्षियेम
इमान्त्रंचपठेदृणपरिहारः १७ मारणार्थं एवमुक्त्वासमुत्पत्य सारूढातंमहासुरं
पादेनाक्रम्यकंठेचशूलेनैनमताडयत् श्लोकंप्रतिश्लोकंपठेन्मारणेक्ताहुतिभिः
फलसिद्धिः १८ ज्ञानिनामपिचेतांसिदेवीभगवतीहिसा बलादाकृष्यमोहाय
महामायाप्रयच्छति इतिश्लोकजपमात्रेणसद्योमोहनमित्यनुभवसिद्धं प्रतिश्लो
कंतत्श्लोकपाठेत्ववश्यम् १९ रोगानशेषानपहंसितुष्टा रुष्टातुकामान्सकलान
भीष्टान् त्वामाश्रितानांनविपन्नराणांत्वामाश्रिताह्याश्रयतांप्रयांति इतिश्लोकस्य
प्रतिश्लोकंपाठेसकलरोगनाशः तन्मात्रजपेपिसः २० इत्युक्त्वासातदादेवीगंभी

प्र.
३

रांतःस्थिताजगतो दुर्गाभगवतीभद्रायये दंधार्यतेजगत् इतिश्लोकस्यप्रतिश्लो
कंपाठेएथकृजपेवा विद्याप्राप्तिःवाग्वैकृतनाशश्च २१ भगवत्याकृतंसर्वं न
किंचिदवशिष्यते यदयंनिहतःशत्रुरस्माकंमहिषासुरः इत्यादिद्वादशश्लोक
दशताद्वरोमंत्रः सर्वकामदः सर्वापन्निवारणश्च २२ देविप्रपन्नार्तिहरेप्रसी
दप्रसीदमातर्जगतोखिलस्य प्रसीदविश्वेश्वरिपाहिविश्वंत्वमीश्वरीदेविचरा
चरस्य इतिश्लोकस्ययथाकार्यलक्षायुतसहस्रशताष्टतम संख्यजपेप्रतिश्लो
के पाठेवा सर्वापन्निवृत्तिः सर्वकामाप्तिश्च एषुप्रयोगेषुप्रतिश्लोकंदीपाग्रेकेव।
लमेवनमस्करणेऽतिशीघ्रसिद्धिः प्रतिश्लोकंह्रींबीजसंपुटितस्य एकचत्वारिंश
द्दिनेत्रिरावृत्तौसर्वकामसिद्धिः २३ एकविंशतिदिनपर्यंत मकरीमाप्रत्यहं द्वादशा

वृत्तौ वशीकरणम् २४ क्लींबीजसंपुटितस्य फट्पल्लवसहितस्य सप्तदिनप
र्यंतं त्रयोदशावृत्तौ उच्चाटनसिद्धिः २५ तादृशामेव दिनचतुष्टयमेकादशावृ
त्तौ सर्वोपद्रवनाशः २६ एकोनपंचाशद्दिनपर्यंतं प्रतिश्लोकं श्रींबीजसंपुटि
तस्य पंचादशावृत्तौ लक्ष्मीप्राप्तिः २७ प्रतिश्लोकं ऐंबीजसंपुटितस्य शतावृत्या वि
द्याप्राप्तिः २८

अथ शतचंडीविधिः शंकरस्य भवान्या वा
प्रासादनिकटे शुभं मंडपं द्वारवेद्याढ्यं कुर्यात्सध्वजतोरणं १ तत्र कुंडं प्रकुर्वीत प्र
तीच्यां मध्यतोपि वा स्नात्वा नित्यक्रियां कृत्वा वृणुयाद्दशवाडवान् २ जितेंद्रियान्सदा
चारान्कुलीनान्सत्यवादिनः वाडवा ब्राह्मणाः कुर्युर्जां चंडिकापाठरतान् लज्जादयाव
तः ३ मधुपर्कविधानेन स्वर्णवस्त्रादिदानतः जपार्थमासनं मालां दद्यात्तेभ्योपि भोजनं

श्रा॰ ४

ध्यानमश्नंतो मंत्रार्थगतमानसाः भूमौपयानाः प्रत्येकं जपेयुश्चंडिकास्तवं ५
मार्क[illegible]यपुराणोक्तं दशकृत्वः सचेतसः नवार्णं चंडिकामंत्रं जपेयुश्चायुतं पृथक् ६ ८
घृतसंपुटीकरणादितिशेषः प्रत्येकं ब्राह्मणैरयुतजपःकार्यः अष्टमीनवमीचतुर्दशी
पौर्णमासेषु यथाशक्ति तावत्समाप्तिर्भवति तथारंभः कर्तव्य इति सांप्रदायिकाः य
जमानः पूजयेच्च कन्यानां नवकं शुभं द्विवर्षाद्या दशाब्दांताः कुमारीः परिपूजयेत् १ ना
मांक्रमेणनामानि कुमारी १ त्रिमूर्तिः २ कल्याणी ३ रोहिणी ४ कालिका ५ शांभवी ६ दु
र्गा ७ चंडिका ८ सुभद्रा ९ इति नाममंत्रैस्तासां पूजा तत्र हीनाधिकांगीकुष्टव्रणयुता
अंधाकाणाकुब्जपाकेकराकुवरी लोमयुग्देहा दासिजारोगिण्येवमाद्यावर्ज्याः विप्रांस
र्वेष्टसंसिद्धौ यशसे क्षत्रियोद्भवाम् वैश्यजां धनलाभाय पूजाप्रै शूद्रजां यजेत् गंधपुष्प

५

धूपदीप भक्ष्यभोज्यैर्यथाशक्ति वस्त्राभरणैश्च पूजयेत् द्विवर्षा सा कुमार्युक्ता [illegible]
हायनत्रिका चतुरब्दा तु कल्याणी पंचवर्षा तु रोहिणी षडब्दा कालिका प्रोक्ता [illegible]का
सप्तहायना अष्टवर्षा शांभवी स्याद्दुर्गा तु नवहायना सुभद्रा दशवर्षोक्ता नाममंत्रैः प्रपू
जयेत् नाम्नामावाहयेन्मंत्रः प्रोच्यते शंकरोदितः मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं
नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं कुमारिकादिकन्यानां पूजामंत्रान्ब्रुवेऽधुना
जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते त्रिपु
रां त्रिपुराधारां त्रिवर्णां ज्ञानरूपिणीं त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहं कलात्मि
कां कलातीतां कारुण्यहृदयां शिवां कल्याणजननीं देवीं कल्याणीं पूजयाम्यहं अणिमादि
गुणाधारां मकाराद्यक्षरात्मिकां अनंतशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहं कामचारीं शु

पा.
५

5

भ्रांतांकालचक्रस्वरूपिणीं कामदां करुणोदारां कालिकां पूजयाम्यहं चंडवीरां
चंडमायां चंडमुंडप्रभंजनीं पूजयामि सदा देवीं चंडिकां चंडविक्रमां सदानंदकरीं शांतां
सर्वदेवनमस्कृतां सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहं दुर्गमे दुस्तरे कार्ये भवदुःख
विनाशिनीं पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीं सुंदरीं स्वर्णवर्णाभां सुखसौभाग्य
दायिनीं सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहं एतैर्मंत्रैः पुराणोक्तैः स्नातां तां कन्यां समर्चये
त् इति कुमारिकाणां पूजनं वेद्यां विरचिते रम्ये सर्वतोभद्रमंडले घटं संस्थाप्य विधिना त
त्रावाह्यार्चयेच्छिवां तदग्रे कन्यकां स्थाप्य पूजयेद्ब्राह्मणानपि उपचारैस्तु विविधैर्नवा।
र्णावरणान्यपि ॐकारं प्रथमं पीठं पूर्णपीठमतः परं तृतीयं कामपीठं च पूजयेत्संप्रदाय
तः पृथ्वीदिविस्तृपीठस्य गणेशादिचतुष्टयं गणेशक्षेत्रपालौ च पादुके वटुकास्त्रयः आ

ग्नेय्यादिचतुर्दिक्षुपूर्व्वंदेवीचतुष्टयं जयाचविजयाचैवजयंतीचापराजिता पू
र्वोक्तयंत्रे पूर्वकोणेसरस्वतीसहितोब्रह्मा श्रीसहितोविष्णु नैर्ऋत्यामुमयाशिवो
वायव्यां षट्कोणेचक्रमध्यस्थमध्यबीजेश्रीमहालक्ष्मीः ह्रींमहाकाली ऐंमहासर
स्वती दक्षिणवामयोः उदकुसिंहो दक्षिणेमहिषः षट्कोणेषुनंदजारक्तदंतिका
शाकंभरी दुर्गा भीमा भ्रामर्य्यः सविंदुनामाद्यवर्णेनाद्याक्षरसांनाममंत्राः पूजा
दौ तारः प्रणवः अष्टपत्रेषु ब्रह्माणी माहेश्वरी कौमारी वैष्णवी वाराही नारसिंही
ऐंद्री चामुंडा उक्तरीत्यानाममंत्रैःपूज्याः ततोविष्णुमायादि चतुर्विंशतिदेवताःप्रा
गादिक्रमेणकेसरेषुपूज्याः प्रतिपत्रंचकेसरत्रयं नाम्नि विष्णुमाया १ चेतना २ बुद्धिः ३
निद्रा ४ क्षुधा ५ छाया ६ शक्तिः ७ तृष्णा ८ क्षांतिः ९ जातिः १० लज्जा ११ शांतिः १२ श्रद्धा १३

पू॰
६

कां॰ ॥ः १४ लक्ष्मीः १५ धृतिः १६ वृत्तिः १७ स्मृतिः १८ दया १९ तुष्टिः २० पुष्टिः २१ मातृ २२
भ्रांतिः २३ चितिः २४ रूपायतावत्यः सप्तशतीस्तवे पंचमेध्याये आसांचतुर्विंश
[illegible]नोनपाठइति नअमितव्यं कात्यायनीतंत्रविरोधात् नालमूलेत्तसंपृज्य मा
धारादिचतुष्टयं आधारःकूर्मशेषोवचतुर्थीपृथिवीनृप गृहकोणेषुगणेशःक्षे
त्रपालोवटुकोयोगिन्यः प्रागादिदिक्षुइन्द्राद्याश्चेति एवंचतुर्दिनंकुर्यात् तत्र
प्रथमेक्रियकाष्टतिं द्वितीयेद्वे तृतीयेतिस्रः स्रतुर्थेचतस्रइति पंचमेहोमः हो
मद्रव्याणिपायसान्नेक्षिमधाक्तैः द्दीनारंभाफलादिभिः मातलुंगैरिक्षुदंडै र्नारि
केरयुतैस्तिलैः जातीफलैराम्रफलैरन्यैर्मधुरवस्तुभिरिति सप्तशत्यादशांशाहुत्या
प्रतिमंत्रकृतंचरेत् अयुतंचनवार्णेनस्थापितेग्नौविधानतः कृत्वावरणदेवानां

6

होमंतन्नाममंत्रतः कृत्वापूर्णाहुतिंसम्यग्देवमग्निंविसृज्यच अभिषिंचेद्य
ष्टारंविप्रौघःकलशोदकैः निष्कंसुवर्णमथवाप्रत्येकंदक्षिणांदिशेत् भोजयेच्च
शतंविप्रान्मृष्टान्नभोज्यैःपृथग्विधैः तेभ्योपिदक्षिणांदत्वागृह्णीयादाशिषस्तथा ए
वंकृतेजगद्धर्षंसर्वेनश्यन्त्युपद्रवाः इतिशतचंडीविधिः ॥

९

ानमश्चंडिकायै ॐ श्रीमत्सुरासुरराध्यचरणांभोरुहद्युतिं चराचरजगद्धात्री
चंडिकांप्रणमाम्यहं १ शिरोरक्षतुब्रह्माणीमुखंमाहेश्वरीतथा कौमारीहृद
यंरक्षेदुदरंवैष्णवीपरा वाराहीचकटिंगुह्यमैंद्रीचोरूसदामम चामुंडाजानुदे
शंतुपादौरक्षतुचंडिका कुकाटिकांभुजौपृष्ठंदशपादभुजाननी अंगप्रत्यंगसं।
धीश्चसदारक्षंतुमातरः ॐजातशिखायां वेदसेललाटे सुनवामकर्णयोः सो
मंनासिकायां अरातियचक्षुषोः यतओष्ठयोः निदंतेषु दहातितालुनि वेदःजिह्वा
यां सग्रीवायां नःस्कंधोः पर्षहृदि अतिस्तनयोः दुःऊद्धौ गाणिनाभौ विश्वापृष्ठे नावपा
र्श्वोः इवबाहुसयोः सिंधुंशिश्ने दुःकक्षा रतऊर्वोः अतिजंघयोः अग्निःपादयोः ॐजा
तवेदसे सुनवाम अंगुष्ठाभ्यांनमः हृदयायनमः सोममरातियतोतर्जनीभ्यांनमः शि

रमैस्वाहा निदहातिवेदः मध्यमाभ्यांनमः शिखायैवषट् सनःपर्शदति अनामिका
भ्यांनमः कवचायहुं इगाणिविश्वानावेवकनिष्टिकाभ्यांनमः नेत्रत्रयायवौषट् सि
धुंडरितात्यग्निः करतलकरपृष्ठाभ्यांनमः अस्त्रायफट् ॐह्रांग्रं॰ हृद॰ एवंषडंगः ॐऐं
ह्रींश्रीगांगींगणपतयेनमः ॐऐंह्रींश्रींह्रांह्रींह्रांक्षेत्रपालायनमः ॐऐंह्रींश्रींतीक्ष्णशृंगा
यमहिषायनमः ॐऐंह्रींश्रींवनस्पतिपुत्रायसिंहायनमः ॐऐंह्रींश्रींसमस्तगुरुपादुका
भ्योनमः इतिद्वारपालः ॐऐंह्रींश्रींगुरवेनमः परमगुरवेनमः परमाचार्यायनमः पारमे
ष्टिनेनमः आदिसिद्धेभ्योनमः इतिगुरुपूजा ॐऐंह्रींश्रींविश्वेवेनः ॐ वैश्वव्यैनमः ॐ रुद्रा
यनमः ॐ रुद्राण्यैनमः ॐ ब्रह्मणेनमः ॐ ब्रह्माण्यैनमः इतिमिथुनत्रयंदेवीपृष्ठतः पूर्वे ॐऐं
ह्रींश्रींकौमार्यैनमः ॐ ऐंद्र्यैनमः ॐ वाराह्यैनमः इत्यग्रे ॐ चंडिकायैनमः ॐ चामुंडायै

दु. ८

नमः ॐ महालक्ष्म्यै नमः इति पश्चिमे इति देवताद्वयं पुरतः ॐ चामुण्डायै नमः ॐ चण्डमूर्त्यै नमः ॐ
सः नमो भगवति महादुर्गे चण्डिकात्यायनि नमः इति मूलं ॐ नमः पिशिताशिनि किलि किलि
त्रिशूलखड्गहस्ते सिंहारूढे एह्येहि आगच्छ आगच्छ बलिं पूजां गृह्ण गृह्ण सिद्धिं कुरु कुरु ॐ चं
डिकायै नम इत्यावाहनं ॐ विंध्यवासिन्यै नमः ॐ रक्तदंतिकायै नमः ॐ शताक्ष्यै नमः ॐ शाकं
भर्य्यै नमः ॐ ऐं ह्रीं श्रीं भीमायै नमः ॐ ऐं ह्रीं श्रीं भ्रामर्य्यै नमः इत्यावरणं ॐ चामुण्डे पाद्यं गृह्ण
ण नमः अर्घ्यं गृह्ण नमः धूपं गृह्ण नमः दीपं गृह्ण नमः पुष्पं गृह्ण नमः ॐ चंडिके
चामुण्डे गणपति क्षेत्रपाल सहिते बलिं गृह्ण २ नमः ॐ नमः मुसलपाणये क्षेत्रपालाय नमः
इति पूजाविधानं ॐ पटले देवतागात्रं पद्धतिर्देवताशिरः कवचं देवतावक्त्रं सहस्राख्यं भुजं
स्तवं स्तोत्रं देवरसाः प्रोक्तं पंचांगमिदमुत्तमं एकांगेन विहीनस्य जपं मे त्रं च निष्फलं अनेन वि।

पिनायस्तु पूजयित्वा च वाचयेत् तस्मै देव्याः प्रतुष्यंति वितरंति मह द्धनं अनेन विधिना
यस्तु विहीनं पुस्तकं पठेत् तस्य जाप्यं भवेद्व्यर्थं मरण्ये रुदितं यथा ददाति विपुलां सिद्धिं द
दाति विपुलं धनं योजयेत्तस्य वृद्धिः स्यात्स्वेमं प्राप्नोति निश्चयशः पुस्तकं सम्प्रशति कामनेन
विधिनार्चयेत् सर्वान्कामानवाप्नोति रुद्रस्य वचनं यथा ततः संकल्पः ॐ अद्याहं सर्वाबाधा प्रश
मनदुष्टतातुपपत्ति दुःखतोध्यापद्धतत्व दारिद्र्यातुपपत्ति दुष्टवियोगराहित्य शत्रुदस्युराज
शस्त्रा नलतोयौघ सर्प वृश्चिकजन्मताभाव महामारी समुद्भवा शेषोपसर्गोत्पत्ति प्रशमन
सर्वपापक्षय धनधान्यसुतादि प्राप्ति सकलरिपुक्षय कल्याणोत्पत्ति कुलानंद दारुणग्रहपी
डाशांति दुःस्वप्ननाश कामस्तवेतोपपत्ति सर्वसंकटविमुक्ति शुभामति श्रीदुर्गाप्रीतिकामो
मार्कंडेयपुराणांतर्गत सावर्णिः सूर्यतनयः स्मारभ्य सावर्णिर्भविता मनुरित्यंतेन देवीमाहा

ह.
५

म्येन दुर्गादेवीस्तोत्रे नवार्णवमंत्रसंपुटितेन कवचकीलकार्गलरहस्य
सहितेन ब्राह्मणद्वारादध्यादियथाकालं प्रातकृतेन सहस्रकृत्वेन वा देवी
स्तोत्रे यामिंद्रश्चेतथारां विगलितमनसा तो पिवामो न मद्यं पंचानामिंद्रि।
याणां विरतरसनया चर्वयामो न मांसं आलिंग्यामो न कांतां प्रसकुटिलतनौ।
नाडिकांतां सुषुम्णां शून्ये चित्ते विलीने परशिवमिथुने मैथुनं तत्रयोनौ ॥

१

ॐश्रीगणेशायनमः नमश्चंडिकायै मार्कंडेयउवाच ॐयद्गुह्यंपरमंलोकेसर्वर
करंनृणां यन्नकस्यचिदाख्यातंतन्मेब्रूहिपितामह १ ब्रह्मोवाच अस्तिगुह्यतमं
प्रसर्वभूतोपकारकं देव्यास्तुकवचंपुण्यंतच्छृणुष्वमहामुने २ प्रथमंशैलपु
चद्वितीयंब्रह्मचारिणी तृतीयंचंडघंटेतिकूष्मांडेतिचतुर्थकं ३ पंचमंस्कंदमा
तेतिषष्ठंकात्यायनीतिच सप्तमंकालरात्रीतिमहागौरीतिचाष्टमं ४ नवमंसिद्धि
दात्रीचनवदुर्गाःप्रकीर्तिताः उक्तान्येतानिनामानिब्रह्मणैवमहात्मना ५ अग्निनाद
ह्यमानस्तुशत्रुमध्यगतोरणे विषमेदुर्गमेचैवभयार्ताःशरणंगताः ६ नतेषांजाय
तेकिंचिदशुभंरणसंकटे नापदंतस्यपश्यामिशोकदुःखभयंनहि ७ यैस्तुभक्त्या
स्मृतानूनंतेषांवृद्धिःप्रजायते येत्वांस्मरंतिदेवेशिरक्षसेतान्नसंशयः ८ प्रेतसंस्थातु

शोकदुःखक्षयंकरी

क॰
१॰

10

चामुंडावाराहीमहिषासना ऐंद्रीगजसमारूढावैष्णवीगरुडासना ८ माहेश्वरी
वृषारूढाकौमारीशिखिवाहना लक्ष्मीःपद्मासनादेवीपद्महस्ताहरिप्रिया ९ श्वेत
रूपधरादेवीईश्वरीवृषवाहना ब्राह्मीहंससमारूढासर्वाभरणभूषिता ११ इत्येतामातरः
सर्वाःसर्वयोगसमन्विता नानाभरणशोभाढ्यानानारत्नोपशोभिता: १२ दृश्यंतेरथमा
रूढादेव्यःक्रोधसमाकुलाः शंखंचक्रंगदांशक्तिंहलंचमुसलायुधं १३ खेटकंतोमरंचैव
परशुंपाशमेवच कुंतायुधंत्रिशूलंचशार्ङ्गमायुधमुत्तमं दैत्यानांदेहनाशायभक्तानामभ
यायच १४ धारयंत्यायुधानीत्थंदेवानांचहितायवै नमस्तेस्तुमहारौद्रेमहाघोरपराक्रमे १५
महाबलेमहोत्साहेमहाभयविनाशिनि त्राहिमांदेविदुष्प्रेक्ष्येशत्रूणांभयवर्द्धिनि १६
प्राच्यांरक्षतुमामैंद्रीआग्नेय्यांभयवर्द्धिनी दक्षिणेवतुवाराहीनैर्ऋत्यांखड्गधारिणी १७
अग्निदेवता

प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी उदीच्यां पातु कौमारी ईशान्यां शूलधारिणी १७ ८
ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी तथा एवं दश दिशो रक्षेच्चामुण्डा शववाहना १९ जया
मे चाग्रतः पातु विजया पातु पृष्ठतः अजिता वामपार्श्वे तु दक्षिणे चापराजिता २० शिखा
मुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता मालाधरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी २१ त्रिनेत्रा च
भ्रुवोर्मध्ये यमघण्टा च नासिके शंखिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी २२ कपोलौ का
लिका रक्षेत्कर्णमूले तु शंकरी नासिकायां सुगंधा च उत्तरोष्ठे च चर्चिका २३ अधरे चामृत
कला जिह्वायां च सरस्वती दंतान्रक्षतु कौमारी कंठदेशे तु चंडिका २४ घंटिकां चित्रघंटा
च महामाया च तालुके कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमंगला २५ ग्रीवायां भद्रकाली च
पृष्ठवंशे धनुर्धरी नीलग्रीवा बहिःकंठे नलिकां नलकूबरी २६ स्कंधयोः खड्गिनी रक्षेद्बा

शुभंकरी
६

स्कंधौ रक्षेद् धनुर्धरा बाहू मे वज्रधारिणी
हस्तौ शक्तिः रक्षेच्च चण्डी हस्ताङ्गुलीस्तथा
(पाठान्तरं)

क॰
११

ह्रुमेवज्रधारिणी हस्तयोर्दंडिनीरक्षेदंबिकाचांगुलीषुच ॥२७॥ नखाञ्छूलेश्वरीरक्षेत्कक्षौरक्षेत्कलेश्वरी स्तनौरक्षेन्महादेवीमनःशोकविनाशिनी २८ ॥ हृदयेललितादेवी उदरेशूलधारिणी नाभौचकामिनीरक्षेद्गुह्यंगुह्येश्वरीतथा २९ पूतनाकामिकामेढ्रंगुदेमहिषवाहिनी कट्यांभगवतीरक्षेज्जानुनीविंध्यवासिनी ३०जंघेमहाबलारक्षेत्सर्वकामप्रदायिनी गुल्फयोर्नारसिंहीचपादपृष्ठेतुतैजसी ॥३१॥ पादांगुलीषुश्रीधरी रक्षेत्पादाधःस्थलवासिनी नखान्दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ॥३२॥ रोमकूपेषुकौमारीत्वचंवागीश्वरीतथा रक्तमज्जावसामांसान्यस्थिमेदांसिपार्वती ३३ अंत्राणि कालरात्रीचपित्तंचमुकुटेश्वरी पद्मावतीपद्मकोशेकफेचूडामणिस्तथा ३४ ज्वालामुखीनखाज्वालमभेद्यासर्वसंधिषु शुक्रंब्रह्माणिमेरक्षेच्छायांछत्रेश्वरीतथा ३५ अहंकारंम

॥ हृदयंललितादेवी उदरं सिंहवाहना नाभिं कामदविनीरक्षे[illegible] कटिं दृष्टांकमरीतथा गुह्यं गुह्येश्वरी रक्षेत् ऊरू जानू मे गुह्यकेश्वरी भूतेश्वरी तथा मेढ्रं ऊरू में सिंहवाहना कट्यां भगवती रक्षेद्देवी महिषवाहना जंघे महाबला रक्षेत् सर्वकामप्रदायिनी [illegible] पादयोर्नारसिंही च पादपृष्ठेतुतैजसी ॥ (पा॰ ...)

महिषवाहिनी मुकेशिनी (पा॰भेद)

नो बुद्धिं रक्षेन्मे धर्मधारिणी प्राणापानौ तथा व्यानमुदानं च समानकं ३६ वज्रहस्ता
च मे रक्षेत्प्राणकल्पं च शोभनं रसे रूपे च गंधे च शब्दे स्पर्शे च योगिनी ३७ सत्त्वं रजस्तमश्चैव
रक्षेन्नारायणी सदा आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ३८ यशः कीर्त्तिं च लक्ष्मीं च धनं
विद्यां च वज्रिणी गोत्रमिंद्राणी मे रक्षेत्पशून्मे रक्ष चंडिके ३९ पुत्रान्रक्षेन्महालक्ष्मीर्भार्यां र-
क्षतु भैरवी पंथानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ४० राजद्वारे महालक्ष्मीर्विजया सर्वतः
स्थिता रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ४१ तत्सर्वं रक्ष मे देवि जयंती पापनाशिनी
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ४२ कवचेनावृतो नित्यं यत्र यत्रैव गच्छति तत्र त-
त्रार्थलाभश्च विजयः सार्वकामिकः ४३ यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितं परमैश्व-
र्यमतुलं प्राप्स्यते भूतले पुमान् ४४ निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः त्रैलोक्ये तु

रक्ष मे सर्वगात्राणि दुर्गे दुर्गतिहारिणि
सर्वरक्षाकरं पुण्यं कवचं सर्वदा जपेत्
इदं रहस्यं विप्रर्षे भक्त्या तव मयोदितम् (प्रक्षिप्तम्)

इत्यादि पुस्तके
न्नादि च तत्रास्ति

क॰
१२

भवेत्तस्य: कवचेनावृत: पुमान् ४५ इदं तु देव्या: कवचं देवानामपि दुर्लभं य: पठेत्प्र
यतो नित्यं त्रिसंध्यं श्रद्धयान्वित: ४६ दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजिता जीवे
द्वर्षशतं साग्रमपमृत्युविवर्जित: ४७ नश्यंति व्याधय: सर्वे लूताविस्फोटकादय:
स्थावरं जंगमं चैव कृत्रिमं चापि यद्विषं ४८ अभिचाराणि सर्वाणि मंत्रयंत्राणि भूतले
भूचरा: खेचराश्चैव कुलजाश्चोपदेशिका: ४९ सहजा कुलजा माला डाकिनी शाकि-
नी तथा अंतरिक्षचरा घोरा डाकिन्यश्च महाबला: ५० ग्रहभूतपिशाचाश्च यक्षगंध-
र्वराक्षसा: ब्रह्मराक्षसवेताला: कूष्मांडा भैरवादय: ५१ नश्यंति दर्शनात्तस्य कव
चे हृदि संस्थिते मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिकरं परं ५२ यशसा वर्द्धते सोपि
कीर्तिमंडितभूतले जपेत्सप्तशतीं चंडीं कृत्वा तु कवचं पुरा ५३ यावद्भूमंडलं

सहजा कृत्रिमा श्चैव यदिणश्चो पदेशजा:

यावद्भूमौ धराधत्ते (पाठान्तरं)

यन्नैःसशैलवनकाननं तावत्तिष्ठतिमेदिन्यांसंततिःपुत्रपौत्रिकी ५४ देहांते परमंस्थानंयत्सुरैरपिदुर्लभं प्राप्नोतिपुरुषोनित्यंमहामायाप्रसादतः ५५ लभतेपरमंरूपंशिवेनसहमोदते ५६ इतिवाराहपुराणेहरिहरब्रह्माविरचितं देव्याकवचंसमाप्तम् ॥

अ. १३

13

ॐनमश्चंडिकायै जयंतीमंगलाकालीभद्रकालीकपालिनी दुर्गाक्षमाशिवा
धात्रीस्वाहास्वधानमोस्तुते १ जयत्वंदेविचामुंडे जयभूतापहारिणि जयसर्वग
तेदेविकालरात्रिनमोस्तुते २ मधुकैटभविद्राविविधातृवरदेनमः रूपंदेहिज
यंदेहियशोदेहिद्विषोजहि ३ महिषासुरनिर्नाशिभक्तानांसुखदेनमः रू
पंदेहिजयंदेहियशोदेहिद्विषोजहि ४ रक्तबीजवधेदेविचंडमुंडविनाशिनि रूपंदे
हिजयंदेहियशोदेहिद्विषोजहि ५ शुंभस्यैवनिशुंभस्यधूम्राक्षस्यचमर्दिनि रूपंदेहिजयं
देहियशोदेहिद्विषोजहि ६ वंदितांघ्रियुगेदेविसर्वसौभाग्यदायिनि रूपंदेहिजयंदेहि
यशोदेहिद्विषोजहि ७ अचिंत्यरूपचरितेसर्वशत्रुविनाशिनि रूपंदेहिजयंदेहियशोदे
हिद्विषोजहि ८ नतेभ्यःसर्वदाभक्त्याचंडिकेदुरितापहे रूपंदेहिजयंदेहियशोदेहिद्विषो

जहि ९ स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि रूपं देहि जयं देहि यशो देहि
द्विषो जहि १० चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः रूपं देहि जयं देहि यशो देहि द्विषो
जहि ११ देहि सौभाग्यमारोग्यं देहि मे परमं सुखं रूपं देहि जयं देहि यशो देहि द्विषो जहि
विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः रूपं देहि जयं देहि यशो देहि द्विषो जहि १३
विधेहि देवि कल्याणं विधेहि परमां श्रियं रूपं देहि जयं देहि यशो देहि द्विषो जहि १४
सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके रूपं देहि जयं देहि यशो देहि द्विषो जहि १५ विद्या
वन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु रूपं देहि जयं देहि यशो देहि द्विषो जहि १६ प्रचण्डदै
त्यदर्पघ्ने चण्डिके प्रणताय मे रूपं देहि जयं देहि यशो देहि द्विषो जहि १७ चतुर्भुजे च
तुर्वक्त्रसंस्तुते परमेश्वरि रूपं देहि जयं देहि यशो देहि द्विषो जहि १८ कृष्णेन संस्तुते

अ॰
१४

देवि शत्रुघ्नमास्सदांविके रूपंदेहिजयंदेहियशोदेहिद्विषोजहि १९ हिमाचलसुता नाथसंस्तुतेपरमेश्वरि रूपंदेहिजयंदेहियशोदेहिद्विषोजहि २० इंद्राणीपतिसद्भाव पूजितेपरमेश्वरि रूपंदेहिजयंदेहियशोदेहिद्विषोजहि २१ देविप्रचंडदोर्दंडदैत्यद र्पविनाशिनि रूपंदेहिजयंदेहियशोदेहिद्विषोजहि २२ देविभक्तजनोद्दामदत्तानंदो दयेंविके रूपंदेहिजयंदेहियशोदेहिद्विषोजहि २३ पत्नीमनोरमांदेहिमनोवृत्तानुसा रिणीं तारिणींदुर्गसंसारसागरस्यकुलोद्भवां २४ इदंस्तोत्रंपठित्वातुमहास्तोत्रंपठेन्नरः सप्तसप्तशतीसंख्यावरमाप्नोतिसंपदां २५ इतिमार्कंडेयपुराणेअर्गलास्तोत्रंसंपूर्णम्

ॐनमश्चण्डिकायै मार्कंडेयउवाच विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे श्रेयःप्रा
प्तिनिमित्तायनमःसोमार्द्धधारिणे १ सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकं सोपि
क्षेममवाप्नोतिसततंजाप्यतत्परः २ सिद्ध्यन्त्युच्चाटनादीनिवस्तूनिसकलान्यपि एतेन
स्तुवतांदेवीस्तोत्रमात्रेणसिद्ध्यति ३ नमंत्रोनौषधंतत्रनकिंचिदपिविद्यते विनाजा
प्येनसिद्ध्येतसर्वमुच्चाटनादिकं ४ समग्राण्यपिसिद्ध्यंतिलोकशंकामिमांहरः कृत्वानि
मंत्रयामाससर्वमेवमिदंशुभं ५ स्तोत्रंवैचंडिकायास्तुतच्चगुह्यंचकारसः समाप्नोति
सपुण्येनतांयथावन्नियंत्रणां ६ सोपिक्षेममवाप्नोतिसर्वमेवनसंशयः कृष्णायांवाच
तुर्दश्यामष्टम्यांवासमाहितः ददातिप्रतिगृह्णातिनान्यथैषाप्रसिद्ध्यति ७ इत्थंरूपेणकीले
नमहादेवेनकीलितं ८ योनिष्कीलांविधायैनांनित्यंजपतिसंस्फुटं ससिद्धःसगणः।

की॰
१५

15

सोपिगंधर्वोजायतेनरः ९ नचैवाप्यटतस्तस्यभयंकुत्रापिजायते नापमृत्युवशंया
तिमृतोमोक्षमवाप्नुयात् १० ज्ञात्वाप्रारभ्यकुर्वीत नकुर्वाणोविनश्यति ततोज्ञात्वैवसंप
न्नमिदंप्रारभ्यतेबुधैः ११ सौभाग्यादिचयत्किंचिद्दृश्यतेललनाजने तत्सर्वंतत्प्रसा
देनतेनजाप्यमिदंशुभं १२ शनैस्तुजप्यमानेस्मिन्स्तोत्रेसंपत्तिरुच्चकैः भवत्येवसम
ग्रापिततःप्रारभ्यमेवतत् १३ ऐश्वर्यंयत्प्रसादेनसौभाग्यारोग्यसंपदः शत्रुहानिः
परोमोक्षःस्तूयतेसानकिंजनैः १४ इतिभगवत्याःकीलकस्तोत्रंसमाप्तम् ॥

ॐश्रीगणेशायनमः ॐअस्यश्रीनवार्णमंत्रस्य ब्रह्मविष्णुरुद्राऋषयः गायत्र्यु
ष्णिगनुष्टुप्छंदांसि श्रीमहाकालीमहालक्ष्मीमहासरस्वत्योदेवताः ऐंबीजं ह्रींश
क्तिः क्लींकीलकं श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थेजपेविनियोगः ब्र
ह्मविष्णुरुद्रऋषिभ्योनमःशिरसि गायत्र्युष्णिगनुष्टुप्छंदोभ्योनमोमुखे महाकाली
महालक्ष्मीमहासरस्वतीदेवताभ्योनमःहृदि ऐंबीजायनमःगुह्ये ह्रींशक्तयेनमःपाद
योः क्लींकीलकायनमःनाभौ इतिमूलेनकरौसंशोध्य ॐऐंअंगुष्ठाभ्यांनमः ॐह्रींत
र्जनीभ्यांनमः ॐक्लींमध्यमाभ्यांनमः ॐचामुंडायैअनामिकाभ्यांनमः ॐविच्चेकनिष्ठि
काभ्यांनमः ॐऐंह्रींक्लींचामुंडायैविच्चेकरतलकरपृष्ठाभ्यांनमः अथहृदयादिन्यासः
ॐऐंहृदयायनमः ॐह्रींशिरसेस्वाहा ॐक्लींशिखायैवषट् ॐचामुंडायैकव।

न॰
१६
16

चायकुं ॐविच्चे नेत्रत्रयाय वौषट् ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे अस्त्राय फट् ततो
ऽक्षरन्यासः ॐ ऐं नमः शिखायां ॐ ह्रीं नमः दक्षिणनेत्रे ॐ क्लीं नमः वामनेत्रे ॐ चां
नमः दक्षिणकर्णे ॐ मुं नमः वामकर्णे ॐ डां नमः दक्षिणनासायां ॐ यैं नमः वाम
नासायां ॐ विं नमः मुखे ॐ च्चें नमः गुह्ये एवं विन्यस्याष्टवारं मूलेन व्यापकं कुर्यात्
ॐ ऐं प्राच्यै नमः ॐ ऐं आग्नेय्यै नमः ॐ ह्रीं दक्षिणायै नमः ॐ ह्रीं नैर्ऋत्यै नमः ॐ क्लीं
प्रतीच्यै नमः ॐ क्लीं वायव्यै नमः ॐ चामुंडायै उदीच्यै नमः ॐ चामुंडायै ईशान्यै नमः
ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे ऊर्ध्वायै नमः ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे भूम्यै नमः अथ
ध्यानं खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुंडीं शिरः शंखं संदधतीं करैस्त्रिनयनां
सर्वांगभूषावृतां यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभं नीलाश्मद्युतिमास्य

पाददशकांसेवेमहाकालिकां १ अक्षस्रक्परशुंगदेषुकुलिशंपद्मंधनुःकुंडिकां
दंडंशक्तिमसिंचचर्मजलजंघंटांसुराभाजनं शूलंपाशसुदर्शनेचदधतींहस्तैःप्र
सन्नाननांसेवेसैरिभमर्दिनीमिहमहालक्ष्मींसरोजस्थितां २ घंटाशूलहलानिशंख
मुसलेचक्रंधनुःसायकंहस्ताब्जैर्दधतींघनांतविलसच्छीतांशुतुल्यप्रभां गौरीदेहसमु
द्भवांत्रिजगतामाधारभूतांमहापूर्वामत्रसरस्वतीमनुभजेशुंभादिदैत्यार्दिनीं अष्टोत्तरश
तसंख्ययामंत्रराजंजपेत् इतिनवार्णवविधिः ॥

रा॰
सू॰
१७

17

ॐ श्रीदेव्यै नमः अथ रात्रिसूक्तं विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीं निद्रां
भगवतीं विष्णोरतुलां तेजसः प्रभुः १ ब्रह्मोवाच त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्व
रात्मिका सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता २ अर्धमात्रा स्थिता नित्या यानुच्चार्या
विशेषतः त्वमेव सा त्वं सावित्री त्वं देवि जननी परा ३ त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते ज
गत् त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ४ विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पाल
ने तथा संहृतिरूपान्ते जगतोस्य जगन्मये ५ महाविद्या महामाया महामेधा महास्मृतिः
महामोहा च भवती महादेवी महासुरी ६ प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी काल
रात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ७ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा लज्जा
पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ८ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा

शंखिनीचापिनीबाणभुशुंडीपरिघायुधा ९ सौम्यासौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी परापराणांपरमात्वमेवपरमेश्वरी १० यच्चकिंचित्क्वचिद्वस्तुसदसद्वाखिलात्मिके तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तूयसेतदा ११ ययात्वयाजगत्स्रष्टाजगत्पात्यत्तियोजगत् सोपिनिद्रावशंनीतःकस्त्वांस्तोतुमिहेश्वरः १२ विष्णुःशरीरग्रहणमहमीशानएवच कारितास्तेयतोतस्त्वांकःस्तोतुंशक्तिमान्भवेत् १३ सात्वमित्थंप्रभावैःस्वैरुदारैर्देविसंस्तुता मोहयैतौदुराधर्षावसुरौमधुकैटभौ १४ प्रबोधंचजगत्स्वामीनीयतामच्युतोलघु बोधश्चक्रियतामस्यहंतुमेतौमहासुरौ १५ इतिरात्रिसूक्तम् ॥

18

दु॰ ॐ नमश्चण्डिकायै तपस्यंतं महात्मानं मार्कंडेयं महामुनिं व्या
१ सशिष्यो महातेजा जैमिनिः पर्यपृच्छति १ जैमिनिरुवाच मन्वं
तरं प्रुतास्वामिन्ब्रूहि यत्तत्प्रकाशितं सावर्णिको मनुर्नाम कथं
भुविवभूवसः २ ॐ अस्य सप्तशतिका प्रथमचरितस्य सावर्णिः
सूर्य्यतनय इति मंत्रस्य ब्रह्मा ऋषिः महाकाली देवता गायत्री छं
दः नंदः शक्तिः रक्तदंतिका वीजं अग्निस्तत्वं महाकाली प्रीत्यर्थं
धर्मार्थकाममोक्षार्थे ऋग्वेदमूर्तिमयी जपे विनियोगः अथ ध्यानं
खड्गं चक्रगदेषु चापपरिघान्शूलं भुशुंडी शिरः शंखं संदधतीं करै
स्त्रिनयनां सर्वांगभूषावृतां यामस्तौत्स्वपिते हरौ कमलजो हंतुम

युंकैटभं नीलाश्मद्युतिमास्यपाददशकांसेवेमहाकालिकाम्
ॐऐंह्रांनमः मार्कंडेयउवाच १ ॐऐंह्रींनमः सावर्णिःसूर्यतन
योयोमनुःकथ्यतेष्टमः निशामयतदुत्पत्तिंविस्तराद्गदतोमम २
ॐऐंक्लींनमः महामायानुभावेनयथामन्वंतराधिपः सबभूव
महाभागःसावर्णिस्तनयोरवेः ३ ॐऐंश्रींनमः स्वारोचिषेंतरेपूर्वं
चैत्रवंशसमुद्भवः सुरथोनामराजाभूत्समस्तेक्षितिमंडले ४
ॐऐंश्रींनमः तस्यपालयतःसम्यक्प्रजापुत्रानिवौरसान् बभूवुःश
त्रवोभूपाःकोलाविध्वंसिनस्तथा ५ ॐऐंह्रंनमः तस्यतैरभवद्युद्धम
तिप्रबलदंडिनः न्यूनैरपिशत्रैर्युद्धेकोलाविध्वंसिभिर्जितः ६ ॐऐंह्रांनमः

उ.
२

ततः स्वपुरमायातो निजदेशाधिपोभवत् आक्रान्तः स महाभाग
स्तैस्तदा प्रबलारिभिः ७ ॐ ऐं सौं नमः अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य
दुरात्मभिः कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ८ ॐ ऐं श्रीं नमः
ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः एकाकी हयमारुह्य ज
गाम गहनं वनं ९ ॐ ऐं श्रीं नमः स तत्राश्रममद्राक्षीद्द्विजवर्यस्य
मेधसः प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितं १० ॐ ऐं क्लीं न
मः तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः इतश्चेतश्च विचरंस्त
स्मिन्मुनिवराश्रमे ११ ॐ ऐं ह्लीं नमः सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचे
तनः मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् १२ ॐ ऐं ह्लीं नमः

मत्स्यैस्तैरसहैतैर्थमतःपाल्सतेनवः नजानेसप्रयानोमेस्पूरोहस्ली
सदामदः १३ ओं ऐं क्रां नमः ममवैरिवशंयातः कान्भोगानुपलप्स्य
ते येममानुगतानित्यंप्रसादयनभोजनैः १४ ओं ऐं ज्ञां नमः अनुद्द
त्तिं ध्रुवंतेयकुर्वन्त्यन्यमहीभृतो असम्यग्व्ययशीलैस्तैः कुर्वद्भिःसत
तंव्ययं १५ ओं ऐं क्रौं नमः संचितःसोतिदुःखेनक्षयंकोशोगमिष्य
ति एतच्चान्यच्चसततंचिंतयामासपार्थिवः १६ ओं ऐं चां नमः तत्र
विप्राश्रमाभ्यासेवैश्यमेकंददर्शसः सपृष्टस्तेनकस्त्वंभोहेतुश्चागम
नेत्रकः १७ ओं ऐं मैं नमः सशोकइवकस्मात्वंदुर्मनाइवलक्ष्यसे
इत्याकर्ण्यवचस्तस्यभूपतेःप्रणयोदितं १८ ओं ऐं क्रीं नमः प्रत्युवा

३

२

३

च स तं वैश्यः प्रश्रयावनतो नृपं १९ ॐ ऐं वैं नमः वैश्य उवाच २० ॐ ऐं
ह्रौं नमः समाधिर्नाम वैश्योहमुत्पन्नो धनिनां कुले २१ ॐ ऐं क्षौं नमः
पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः विहीनश्च धनैर्दारैः पुत्रैरादा
यमेधनं २२ ॐ ऐं ज्रुं नमः वनमभ्यागतो दुःखी निरस्तश्चाप्तबंधुभिः
सोहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकां २३ ॐ ऐं ह्रुं नमः प्रवृत्तिं
स्वजनानां च दाराणां चात्र संस्थितः किं नु तेषां गृहे क्षेममक्षेमं किं नु
सांप्रतं २४ ॐ ऐं प्लां नमः कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः

२५

ॐ ऐं सौं नमः राजोवाच २६ ॐ ऐं यं नमः यैर्निरस्तो भवांल्लुब्धैः पुत्र
दारादिभिर्धनैः २७ ॐ ऐं वीं नमः तेषु किं भवतः स्नेहमनुबध्नाति

मानसं २८ ॐ ऐं वैं नमः वैश्यउवाच २९ ॐ ऐं चीं नमः एवमे
तद्यथाप्राहभवानस्मद्गतंवचः ३० ॐ ऐं ज्ञीं नमः किंकरोमिनब
ध्नातिममनिष्ठुरतांमनः यैःसंत्यज्यपितृस्नेहंधनलुब्धैर्निराकृतः ३१
ॐ ऐं क्रूं नमः पतिःस्वजनहार्दंचहार्दितेष्वेवमेमनः किमेतन्ना।
भिजानामिजानन्नपिमहामते ३२ ॐ ऐं सं नमः यत्प्रेमप्रवणंचित्तं
विगुणेष्वपिबन्धुषु तेषांकृतेमेनिःश्वासोदौर्मनस्यंचजायते ३३
ॐ ऐं कं नमः करोमिकिंयन्नमनस्तेष्वप्रीतिषुनिष्ठुरं ३४ ॐ ऐं म्रां
नमः मार्कंडेयउवाच ३५ ॐ ऐं शें नमः ततस्तौसहितौविप्रतंमुनिं
समुपस्थितौ ३६ ॐ ऐं ह्रां नमः समाधिर्नामवैश्योऽसौसचपार्थिव

सन्नमः कृत्वा ततो यथान्यायं यथार्हं तेन संविदं ३७ ॐ ऐं ऊँ नमः उ
पविष्टो कथाः काश्चिच्चक्रे वैश्यपार्थिवौ ३८ ॐ ऐं रौं नमः राजोवाच
ॐ ऐं ह्रां नमः भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ४० ॐ ऐं ह्रीं न
मः दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ममत्वं मम राज्यस्य राज्यां
गेष्वखिलेष्वपि ४१ ॐ ऐं ह्रां नमः जानतोपि यथाज्ञस्य किमेतन्मुनि।
सत्तम अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ४२ ॐ ऐं क्रूं नमः
स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति एवमेष तथाहं च द्वावप्य
त्यन्त दुःखितौ ४३ ॐ ऐं श्रां नमः दृष्टदोषेपि विषये ममत्वाकृष्टमान।
सौ तत्केनैतन्महाभाग यन्मोहो ज्ञानिनोरपि ४४ ॐ ऐं सीं नमः

ममास्यचभवत्येषाविवेकांधस्यमूढता ४५ ॐ ऐं [illegible] नमः ऋषि
रुवाच ४६ ॐ ऐं जं नमः ज्ञानमस्तिसमस्तस्यजंतोर्विषयगोचरे ४७
ॐ ऐं ह्रूं नमः विषयाश्चमहाभागयांतिचैवंपृथक्पृथक् दिवांधाः प्रा।
णिनःकेचिद्रात्रावंधास्तथापरे ४८ ॐ ऐं स्रूं नमः केचिद्दिवातथारात्रौ
प्राणिनस्तुल्यदृष्टयः ज्ञानिनोमनुजाःसत्यंकिंतुतेनहिकेवलं ४९
ॐ ऐं श्रीं नमः यतोहिज्ञानिनःसर्वेपशुपक्षिमृगादयः ज्ञानंचतन्म।
नुष्याणांयत्तेषांमृगपक्षिणां ५० ॐ ऐं रं नमः मनुष्याणांचयत्तेषांतु
ल्यमन्यत्तथोभयोः ज्ञानेपिसतिपश्यैतान्पतंगाञ्छावचंचुषु ५१ ॐ ऐं वं
नमः कणमोक्षादृतान्मोहात्पीड्यमानानपिक्षुधा मनुष्यामनुजव्याघ्र।

साभिलाषाः सुतान्प्रति ५२ ॐ ऐं ह्रीं नमः लोभात्प्रत्युपकाराय नन्वेता
किं न पश्यसि तथापि ममतावर्त्ते मोहगर्त्ते निपातिताः ५३ ॐ ऐं स्लूं नमः
महामायाप्रभावेन संसारस्थितिकारिणः तन्नात्र विस्मयः कार्यो योग
निद्रा जगत्पतेः ५४ ॐ ऐं क्लीं नमः महामाया हरेश्चैषा तया संमोह्यते ज
गत् ज्ञानिनामपि चेतांसि देवी भगवती हि सा ५५ ॐ ऐं ह्रां नमः बलादा
कृष्य मोहाय महामाया प्रयच्छति तया विसृज्यते विश्वं जगदेतच्चरा
चरं ५६ ॐ ऐं स्लूं नमः सैषा प्रसन्ना वरदा नृणां भवति मुक्तये सा विद्या प
रमा मुक्तेर्हेतुभूता सनातनी ५७ ॐ ऐं क्रां नमः संसारबन्धहेतुश्च सै
व सर्वेश्वरेश्वरी ५८ ॐ ऐं रौं नमः राजोवाच ५९ भगवन्का हि सा देवीम

हामायेतियांभवान् ६०. ॐ ऐं स्हौं नमः ब्रवीतिकथमुत्पन्नासाक
र्मास्याश्चकिंद्विज यत्प्रभावाचसादेवीयत्स्वरूपायदुद्भवा ६१ ॐ ऐं क्रूं
नमः तत्सर्वंश्रोतुमिच्छामित्वत्तोब्रह्मविदांवर ६२ ॐ ऐं श्रैं नमः ऋषि
रुवाच ६३ नित्यैवसाजगन्मूर्तिस्तयासर्वमिदंततं ६४ ॐ ऐं श्रों नमः
तथापितत्समुत्पत्तिर्बहुधाश्रूयतांमम देवानांकार्यसिद्ध्यर्थमाविर्भ
वतिसायदा ६५ ॐ ऐं वं नमः उत्पन्नेतितदालोकेसानित्याप्यभिधीय
ते योगनिद्रांयदाविष्णुर्जगत्येकार्णवीकृते ६६ ॐ ऐं त्रूं नमः आस्ती
र्यशेषमभजत्कल्पांतेभगवान्प्रभुः तदाद्वावसुरौघोरौविख्यातौम
धुकैटभौ ६७ ॐ ऐं क्रूं नमः विष्णुकर्णमलोद्भूतौहंतुंब्रह्माणमुद्यतौ

उ॰
६

सनाभिकमलेविष्णोःस्थितोब्रह्माप्रजापतिः ६८ ॐ ऐं ज्रूं नमः दृष्ट्वाता
वसुरौचोग्रौप्रसुप्तंचजनार्दनं तुष्टावयोगनिद्रांतामेकाग्रहृदयस्थितः ६९
ॐ ऐं क्लीं नमः विबोधनार्थायहरेर्हरिनेत्रकृतालयां विश्वेश्वरींजगद्धात्रीं।
स्थितिसंहारकारिणीं ७० ॐ ऐं स्हौं नमः निद्रांभगवतींविष्णोरतुलांतेजसः
प्रभोः ७१ ॐ ऐं स्रूं नमः ब्रह्मोवाच ७२ ॐ ऐं ब्रां नमः त्वंस्वाहात्वंस्वधात्वंहि
वषट्कारःस्वरात्मिका ७३ ॐ ऐं वौं नमः सुधात्वमक्षरेनित्येत्रिधामात्रात्मि
कास्थिता अर्धमात्रास्थितानित्यायानुच्चार्याविशेषतः ७४ ॐ ऐं ज्ञां नमः
त्वमेवसंध्यासावित्रीत्वंदेविजननीपरा त्वयैवधार्य्यतेसर्वंत्वयैतत्सृज्यते
जगत् ७५ ॐ ऐं स्लूं नमः त्वयैतत्पाल्यतेदेवित्वमत्स्यन्तेचसर्वदा विसृ।

6

६

सृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ७६ ॐ ऐं क्रौं नमः तथा संहृति
रूपान्ते जगतोऽस्य जगन्मये महाविद्या महामाया महामेधा महास्मृतिः ७७
ॐ ऐं ब्रें नमः महामोहा च भवती महादेवी महेश्वरी प्रकृतिस्त्वं च सर्व
स्य गुणत्रयविभाविनी ७८ ॐ ऐं त्रें नमः कालरात्रिर्महारात्रिर्मोहरात्रि
श्च दारुणा त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ७९ ॐ ऐं जीं नमः
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च खड्गिनी शूलिनी घोरा गदि
नी चक्रिणी तथा ८० ॐ ऐं ल्रूं नमः शंखिनी चापिनी बाणा भुशुण्डी परिघा।
युधा सौम्या सौम्यतराशेष सौम्येभ्यस्त्वति सुन्दरी ८१ ॐ ऐं ह्रौं नमः परापरा
णां परमा त्वमेव परमेश्वरी यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ८२

ॐ ऐं नौं नमः तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा यया त्वया ज
गत्स्रष्टा जगत्पाताऽत्ति यो जगत् ८३ ॐ ऐं स्त्रीं नमः सोऽपि निद्रावशं नी
तः कस्त्वां स्तोतुमिहेश्वरः विष्णुः शरीरग्रहणमहमीशान एव च ८४
ॐ ऐं क्रूं नमः कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् सा त्वमि
त्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ८५ ॐ ऐं स्त्रूं नमः मोहयैतौ दुराधर्षा
वसुरौ मधुकैटभौ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ८६ ॐ ऐं ज्रां
नमः बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ८७ ॐ ऐं वौं नमः ऋषि
रुवाच ८८ ॐ ऐं ॐ नमः एवं स्तुता तदा देवी तामसी तत्र वेधसा ८९ ॐ
ऐं श्रौं नमः विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ नेत्रास्यनासिका

ॐ ऐं क्रीं नमः

वाहुहृदयेभ्यस्तथोरसः ७० ॐ ऐं ॠं नमः निर्गम्य दर्शने तस्थौ ब्रह्मणो
व्यक्तजन्मनः उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ७१ ॐ ऐं ॡं नमः ए
कार्णवेऽहिशयनात्ततःस ददृशे च तौ मधुकैटभौ दुरात्मानावतिवीर्यपरा
क्रमौ ७२ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ समुत्थाय ततस्ताभ्यां
युयुधे भगवान्हरिः ७३ ॐ ऐं ङं नमः पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ७४ ॐ ऐं ञं नमः उक्तवन्तौ वरोऽस्म
त्तो व्रियतामिति केशवं ७५ ॐ ऐं ॠं नमः भगवानुवाच ७६ ॐ ऐं लां नमः
भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ७७ ॐ ऐं ह्रां नमः किमन्येन वरेणात्र
एतावद्धि वृतं मम ७८ ॐ ऐं गं नमः ऋषिरुवाच ७९ ॐ ऐं पं नमः वञ्चिताभ्या

उ॰
८

मितिनदासर्वमापोमयंजगत् ११ ॐ ऐं स्रौं नमः विलोक्यताभ्यांगदितो
भगवान्कमलेक्षणः आवांजहिनयत्रोर्वीसलिलेनपरिप्लुता ११ ॐ ऐं ज्रूं नमः
ऋषिरुवाच १२ ॐ ऐं ह्रीं नमः तथेत्युक्त्वाभगवतांशंखचक्रगदाभृता कृत्वाच
क्रेणवैछिन्नेजघनेशिरसीतयोः १३ ॐ ऐं स्रौं नमः एवमेषासमुत्पन्नाब्रह्मणा
संस्तुतास्वयं प्रभावमस्यादेव्यास्तुभूयःशृणुवदामिते १४ इतिमार्कण्डेयपुरा
णेसावर्णिकेमन्वन्तरेदेवीमाहात्म्येमधुकैटभवधोनामप्रथमोध्यायः १
सांगायै वाग्भवबीजाधिष्ठात्र्यै महाकाल्यै महाहुतिं समर्पयामिनमःस्वाहा

ॐ चंडिकामाहात्म्य मध्यमचरित्रस्य देवासुरमभूद्युद्धमिति मंत्रस्य विष्णुऋ
षि र्महालक्ष्मीदेवता उष्णिक्छंदः शाकंभरीशक्तिः दुर्गाबीजं वायुस्तत्त्वं म
हालक्ष्मीप्रीत्यर्थे धर्मार्थकाममोक्षार्थे जपे विनियोगः अथ ध्यानं अक्षस्र
क्परशुं गदेषुकुलिशं पद्मं धनुष्कुंडिकां दंडं शक्तिमसिं च चर्म जलजं घंटां सु
राभाजनं शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्दि
नीमिह महालक्ष्मीं सरोजस्थितां ऋषिरुवाच १ ॐ ऐं ह्रीं नमः देवासुरम
भूद्युद्धं पूर्णमब्दशतं पुरा महिषेऽसुराणामधिपे देवानां च पुरंदरे २ ॐ ऐं ह्रीं
नमः तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितं जित्वा च सकलान्देवानिंद्रोऽभून्म
हिषासुरः ३ ॐ ऐं क्लीं नमः ततः पराजिता देवाः पद्मयोनिं प्रजापतिं पुरस्कृ।

२
उ
५

त्यगतास्तत्रयत्रेशागरुडध्वजौ ४ ॐ ऐं श्रं नमः यथावृत्तं तयोस्तद्वन्महिषा
स्रचेष्टितं त्रिदशाः कथयामासुर्देवाभिभवविस्तरं ५ ॐ ऐं ह्रीं नमः सूर्येन्द्रा
ग्न्यनिलेन्दूनां यमस्य वरुणस्य च अन्येषां चाधिकारान्स स्वयमेवाधितिष्ठति ६
ॐ ऐं चां नमः स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि विचरन्ति यथा मर्त्या म
हिषेण दुरात्मना ७ ॐ ऐं ह्रं नमः एतद्वः कथितं सर्वं ममरारिविचेष्टितं शर
णं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यतां ८ ॐ ऐं डां नमः इत्थं निशम्य देवानां व
चांसि मधुसूदनः चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ ९ ॐ ऐं यें नमः त
तोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः निश्चक्राम महत्तेजो ब्रह्मणः शंकर
स्य च १० ॐ ऐं विं नमः अन्येषां चैव देवानां शक्रादीनां शरीरतः निर्गतं सुम

१

हृतेजस्तस्तैकंसमगच्छत ११ ॐ ऐं चीं नमः अतीवतेजसः कूटं ज्वलंत मिवपर्वतं ददृशुस्तेसुरास्तत्रज्वालाव्याप्तदिगंतरं १२ ॐ ऐं ईं नमः अ तुलंतत्रतत्तेजः सर्वदेवशरीरजं एकस्थंतदभून्नारीव्याप्तलोकत्रयंत्वि षा १३ ॐ ऐं सौं नमः यदभूच्छांभवंतेजस्तेनाजायततन्मुखं याम्येनचाभ वन्केशावाहवोविष्णुतेजसा १४ ॐ ऐं त्रां नमः सौम्येनस्तनयोर्युग्मंमध्यं चैंद्रेणचाभवत् वारुणेनचजंघोरूनितंवस्तेजसाभुवः १५ ॐ ऐं क्रां नमः ब्रह्मणस्तेजसापादौतदंगुल्योर्कतेजसा वसूनांचकरांगुल्यः कौवेरेण चनासिका १६ ॐ ऐं लूं नमः तस्यास्तुदंताःसंभूताःप्राजापत्येनतेजसा नयनत्रितयंजज्ञे तथापावकतेजसा १७ ॐ ऐं वं नमः भ्रुवौचसंध्ययो।

२ दु० १०

10

स्तेजः श्रवणावनिलस्य च अन्येषां चैव देवानां संभवस्तेजसा शिवा १८ ॐ ऐं
ड्रं नमः ततः समस्तदेवानां तेजोराशिसमुद्भवां तां विलोक्य मुदं प्रापुरमराम
हिषार्दिताः १९ ॐ ऐं क्रीं नमः शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् च
क्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः २० ॐ ऐं स्रौं नमः शंखं च वरुणः शा
क्तिं ददौ तस्यै हुताशनः मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी २१ ॐ ऐं यं न
मः वज्रमिंद्रः समुत्पाद्य कुलिशादमराधिपः ददौ तस्यै सहस्राक्षो घंटामैराव
ताद्गजात् २२ ॐ ऐं रं नमः कालदंडाद्यमो दंडं पाशं चांबुपतिर्ददौ प्रजापतिश्चा
क्षमालां ददौ ब्रह्मा कमंडलुं २३ ॐ ऐं सुं नमः समस्तरोमकूपेषु निजरश्मी
दिवाकरः कालश्च दत्तवान्खड्गं तस्यै चर्म च निर्मलं २४ ॐ ऐं सः नमः क्षीरोद

श्यामलं हारमजरेवचतथांबरे द्दडामणिंतथादिव्यंकुंडलेकटकानिच २५
ॐ पें हूं नमः अर्द्धचंद्रंतथाशुभ्रं केयूरान्सर्वबाहुषु नूपुरौविमलौतद्वद्ग्रै
वेयकमनुत्तमं २६ ॐ पें सें नमः अंगुलीयकरत्नानिसमस्तास्वंगुलीषु
च विश्वकर्माददौतस्मै परशुं चातिनिर्मलं २७ ॐ पें सौं नमः अस्त्राण्यनेक
रूपाणितथाभेद्यंचदंशनं अम्लानपंकजांमालांशिरस्युरसिचापरां २८
ॐ पें शं नमः अददज्जलधिस्तस्मैपंकजंचातिशोभनं हिमवान्वाहनंसिं
हंरत्नानिविविधानिच २९ ॐ पें हूं नमः ददावशून्यंसुरयापानपात्रंधना
धिपः शेषश्चसर्वनागेशोमहामणिविभूषितं ३० ॐ पें ह्रौं नमः नागहारं
ददौतस्मैयन्नेयःपृथिवीमिमां अन्यैरपिसुरैर्देवीभूषणैरायुधैस्तथा ३१ ॐ

२
उ.
११

पेंस्त्रींनमः सम्मानितानननादोच्चैः सादृह्मासमभुत्पुरुः तस्यानादेनघोरे
णाकृतमापूरितंनमः ३२ ॐपेंस्त्रांनमः अमायनातिमहताप्रतिशाब्दोमहान
भूत् चुक्षुभुःसकलालोकाःसमुद्राश्चचकंपिरे ३३ ॐपेंप्रेंनमः चचालवसु
धाचेलुःसकलाश्चमहीधराः जयेतिदेवाश्चमुदातामूचुःसिंहवाहनां ३४ ॐपेंशं
नमः तुष्टुवुर्मुनयश्चेनांभक्तिनम्रात्ममूर्तयः दृष्ट्वासमस्तंसंक्षुब्धंत्रैलोक्यम
मरारयः ३५ ॐपेंह्रांनमः सन्नद्धाखिलसैन्यास्तेसमुत्तस्थुरुदायुधाः आःकि
मेतदितिक्रोधादाभाष्यमहिषासुरः ३६ ॐपेंस्त्रुंनमः अभ्यधावततंशब्दमशे
षैरसुरैर्वृतः सददर्शततोदेवींव्याप्तलोकत्रयांत्विषा ३७ ॐपेंऊंनमः पादाक्रां
त्यानतभुवंकिरीटोल्लिखितांबरान् क्षोभिताशेषपातालांधनुर्ज्यानिःस्वनेनतां ३८

ॐ ऐं ग्लूं नमः दिशोभुजसहस्रेणसमन्ताद्व्याप्यसंस्थितां ततःप्रववृतेयुद्धंत
यादेव्यासुरद्विषां ३९ ॐ ऐं श्रूं नमः शस्त्रास्त्रैर्बहुधामुक्तैरादीपितदिगन्तरं म
हिषासुरसेनानीश्चिक्षुराख्योमहासुरः ४० ॐ ऐं ह्रूं नमः युयुधेचामरश्चान्यैश्चतु
रंगबलान्वितः रथानामयुतैःषड्भिरुदग्राख्योमहासुरः ४१ ॐ ऐं भें नमः अयुध्य
तायुतानांचसहस्रेणमहाहनुः पंचाशद्भिश्चनियुतैरसिलोमामहासुरः ४२
ॐ ऐं क्रां नमः अयुतानांशतैःषड्भिर्बाष्कलोयुयुधेरणे गजवाजिसहस्रौघैरने
कैःपरिवारितः ४३ ॐ ऐं क्लूं नमः वृतोरथानांकोट्याचयुद्धेतस्मिन्नयुध्यत वि
डालाख्योयुतानांचपंचाशद्भिरथायुतैः ४४ ॐ ऐं मूं नमः युयुधेसंयुगेतत्ररथानां
परिवारितः अन्येचतत्रायुतशोरथनागहयैर्वृतः ४५ ॐ ऐं लीं नमः युयुधुः

संयुगेदेव्यासहतत्रमहासुराः कोटिकोटिसहस्रैस्तुरथानांदंतिनांतथा ४६
ॐऐंष्रांनमः हयानांचवृतोयुद्धेतत्राभून्महिषासुरः तोमरैर्भिंडिपालैश्चशक्ति
भिर्मुसलैस्तथा ४७ ॐऐंड्रूंनमः युयुधुःसंयुगेदेव्याःखड्गैःपरशुपट्टिशैः केचिच्च
चिक्षिपुःशक्तीःकेचित्पाशांस्तथापरे ४८ ॐऐंक्रूंनमः देवीखड्गप्रहारैस्तुतेतांहं
तुंप्रचक्रमुः सापिदेवीततस्तानिशस्त्राण्यस्त्राणिचंडिका ४९ ॐऐंह्रौंनमः ली
लयैवप्रचिच्छेदनिजशस्त्रास्त्रवर्षिणी अनायस्ताननादेवीस्तूयमानासुरर्षिभिः ५०
ॐऐंक्रांनमः मुमोचासुरदेहेषुशस्त्राण्यस्त्राणिचेश्वरी सोपिक्रुद्धोधुतसटो
देव्यावाहनकेसरी ५१ ॐऐंस्हौंनमः चचारासुरसैन्येषुवनेष्विवहुताशनः
निःश्वासान्मुमुचेयांश्चयुध्यमानारणेंबिका ५२ ॐऐंम्लूंनमः तएवसद्यःसंभू

नागणशतसहस्रशः युयुधुस्तेपरशुभिर्भिंडिपालासिपट्टिसैः ५३ ॐ ऐं ख्रीं
नमः नाशयंतोसुरगणान्देवीशक्त्युपबृंहिताः अवादयंतपटहान्गणाःशंखा
स्तथापरे ५४ ॐ ऐं गैं नमः मृदंगांश्चतथैवान्येतस्मिन्युद्धमहोत्सवे ततोदेवी
त्रिशूलेनगदयाशक्तिवृष्टिभिः ५५ ॐ ऐं स्तूं नमः खड्गादिभिश्चशतशोनिजघा
नमहासुरान् पातयामासचैवान्यान्घंटास्वनविमोहितान् ५६ ॐ ऐं ग्रीं नमः
असुरान्भुविपाशेनबद्ध्वाचान्यानकर्षयत् केचिद्द्विधाकृतास्तीक्ष्णैःखड्गपातैस्त
थापरे ५७ ॐ ऐं क्लीं नमः विपोथितानिपातेनगदयाभुविशेरते वेमुश्चकेचि
द्रुधिरंमुसलेनभृशंहताः ५८ ॐ ऐं कं नमः केचिन्निपतिताभूमौभिन्नाःशूले
नवक्षसि निरंतराःशरौघेणकृताकेचिद्रणाजिरे ५९ ॐ ऐं ड्रीं नमः सेनानु

२
३:
१२

कारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः केषांचिद्बाहवश्छिन्नाः छिन्नग्रीवास्तथापरे ९०
ॐ ऐं ह्रीं नमः शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः विच्छिन्नजंघास्त्वपरे पे
तुरुर्व्यां महासुराः ९१ ॐ ऐं श्रीं नमः एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा
कृताः छिन्नेपि चान्ये शिरसि पतिताः पुनरुत्थिताः ९२ ॐ ऐं ह्रीं नमः कबंधा
युयुधुर्देव्या गृहीतपरमायुधाः ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ९३ ॐ
ऐं ॐ नमः कबंधाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः तिष्ठ तिष्ठेति भाषन्तो देवी
मन्ये महासुराः ९४ ॐ ऐं रीं नमः पातितै रथनागाश्वैरसुरैश्च वसुंधरा अगम्या
साभवत्तत्र यत्राभूत्स महारणः ९५ ॐ ऐं ऊं नमः शोणितौघा महानद्यः सद्य
स्तत्र प्रसुस्रुवुः मध्ये चासुरसैन्यस्य वारणासुरवाजिनां ९६ ॐ ऐं ह्रीं नमः

ततोदेवीखड्गचर्मधरोसुरः ६ ॐ ऐं ब्रीं नमः सिंहमाहत्यखड्गेनतीक्ष्णधा
रेणमूर्द्धनि आजघानभुजेसव्येदेवीमप्यतिवेगवान् ७ ॐ ऐं ह्लीं नमः तस्याः
खड्गोभुजंप्राप्यपफालनृपनंदन ततोजग्राहशूलंसकोपादरुणलोचनः ८
ॐ ऐं ब्रीं नमः चिक्षेपचततस्तत्तुभद्रकाल्यांमहासुरः जाज्वल्यमानंतेजोभी
रविबिंबमिवांबरात् ९ ॐ ऐं ह्रौं नमः दृष्ट्वातदापतच्छूलंदेवीशूलममुंच
त तेनतच्छतधानीतंशूलंसचमहासुरः १० ॐ ऐं ग्रां नमः हतेतस्मिन्महा
वीर्येमहिषस्यचमूपतौ आजगामगजारूढश्चामरस्त्रिदशार्दनः ११ ॐ ऐं
ग्रीं नमः सोपिशक्तिंमुमोचाथदेव्यास्तामंबिकाद्रुतं हुंकाराभिहतांभूमौपा
तयामासनिष्प्रभां १२ ॐ ऐं हूं नमः भग्नांशक्तिंनिपतितांदृष्ट्वाक्रोधसमा

न्वितः चिक्षेपचामरः शूलंवाणैस्तदपिसाछिनत् १३ ॐ ऐं क्रीं नमः ततः
सिंहःसमुत्पत्यगजकुंभांतरेस्थितः वाहुयुद्धेनयुयुधेतेनोच्चैस्त्रिदशारिणा
ॐ ऐं यां नमः युध्यमानौततस्तौतुतस्मान्नागान्महींगतौ युयुधातेतिसंरब्धौ
प्रहारैरतिदारुणैः १५ ॐ ऐं ह्लूं नमः ततोवेगात्खमुत्पत्यनिपत्यचमृगारिणा
करप्रहारेणशिरश्चामरस्यपृथक्कृतं १६ ॐ ऐं ङुं नमः उदग्रश्चरणेदेव्याशि
लावृक्षादिभिर्हतः दंतमुष्टितलैश्चैवकरालश्चनिपातितः १७ ॐ ऐं ह्रं नमः
देवीक्रुद्धागदापातैश्चूर्णयामासचोद्धतं वाष्कलंभिंडिपालेनवाणैस्ताम्रंत
थांधकं १८ ॐ ऐं ङें नमः उग्रास्यमुग्रवीर्यंचतथैवचमहाहनुं त्रिनेत्रंचत्रिशू
लेनजघानपरमेश्वरी १९ ॐ ऐं क्रौं नमः विडालस्यासिनाकायात्पातया

क्षणेन तन्महासैन्यमसुराणां तथाम्बिका निन्ये क्षयं यथा वह्निस्तृणदारु म
हाचयं ६७ ॐ ऐं ह्रूं नमः सच सिंहो महानादमुत्सृजन्धुतकेसरः शरीरेभ्योम
रारीणामसूनिव विचिन्वति ६८ ॐ ऐं श्रौं नमः देव्यागणैश्च तैस्तत्र कृतं युद्धं तथा
सुरैः यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ६९ इति मार्कण्डेयपुराणे साव
र्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः २
सांगायै लक्ष्मीबीजाधिष्ठात्र्यै महालक्ष्म्यै महाहुतिं समर्पयामि नमः स्वाहा २

३
उ.
१४

15

अथ ध्यानं उद्यद्भानुसहस्रकांतिमरुणक्षौमां शिरोमालिकां रक्तालिप्तप
योधरां जपवटीं विद्यामभीतिं वरं हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविंदश्रि
यं देवीं बद्धहिमांशुरत्नमुकुटां वंदे समंदस्मितां ३ ॐ ऐं ह्रीं नमः ऋषिरुवाच १
ॐ ऐं स्रां नमः निहन्यमानं तत्सैन्यमवलोक्य महासुरः सेनानीश्चिक्षुरः कोपा
द्ययौ योद्धुमथाम्बिकां १ ॐ ऐं ज्रां नमः स देवीं शरवर्षेण ववर्ष समरेऽसुरः य
था मेरुगिरेः शृंगं तोयवर्षेण तोयदः २ ॐ ऐं ह्रूं नमः तस्य छित्वा ततो देवी ली
लयैव शरोत्करान् जघान तुरगान्बाणैर्यंतारं वाजिनां रथं ४ ॐ ऐं श्रौं नमः
चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितं विव्याध चैनं गात्रेषु छिन्नधन्वानमा
शुगैः ५ ॐ ऐं क्रौं नमः स छिन्नधन्वा विरथो हताश्वो हतसारथिः अभ्यधाव

मासवैशिरः उर्द्धरंडुम्भिर्वेचोभौपौरैर्निन्येयमक्षयं २० ॐ ऐं ह्सीं नमः ए
वंसंक्षीयमाणेतुस्वसैन्येमहिषासुरः माहिषेणस्वरूपेणत्रासयामास
तान्गणान् २१ ॐ ऐं वां नमः कांश्चित्तुंडप्रहारेणखुरक्षेपैस्तथापरान्
लांगूलताडितांश्चान्यान्शृंगाभ्यांचविदारितान् २२ ॐ ऐं स्रूं नमः वेगेन
कांश्चिदपरान्नादेनभ्रमणेनच निःश्वासपवनेनान्यान्पातयामासभूतले २६
ॐ ऐं ग्लूं नमः निपात्यप्रमथानीकमभ्यधावतसोसुरः सिंहंहंतुंमहादे
व्याः कोपंचक्रेततोम्बिका २४ ॐ ऐं ल्रीं नमः सोपिकोपान्महावीर्यः खुर
क्षुण्णमहीतलः शृंगाभ्यांपर्वतानुच्चांश्चिक्षेपचननादच २५ ॐ ऐं श्रीं नमः
वेगभ्रमणविक्षुण्णामहीतस्यव्यशीर्यत लांगूलेनाहतश्चाब्धिः प्लावया

३
उ॰
१६

मासमर्वत: २६ ॐ ऐं ह्रूं नम: धुतशृंगविभिन्नाश्च खंडं खंडं ययुर्घना: श्वासानिलास्ता: शतशो निपेतुर्नभसोचला: २७ ॐ ऐं ह्रीं नम: इति क्रोधसमाध्मातमापतंतं महासुरं दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाकरोत् २८ ॐ ऐं दैं नम: सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासुरं तत्याज माहिषं रूपं सोपि बद्धो महामृधे २९ ॐ ऐं ह्रूं नम: तत: सिंहोभवत्सद्यो यावत्तस्याम्बिका शिर: छिनत्ति तावत्पुरुष: खड्गपाणिरदृश्यत ३० ॐ ऐं ग्रों नम: तत एवाशु पुरुषं देवी चिच्छेद सायकै: तं खड्गचर्मणा सार्द्धं तत: सोभून्महागज: ३१ ॐ ऐं फ्रां नम: करेण च महासिंहं तं चकर्ष जगर्ज च कर्षतस्तु करं देवी खड्गेन निरकृंतत ३२ ॐ ऐं घ्रीं नम: ततो महासुरो भूयो माहिषं व

शराख्यितः तथैवक्षोभयामास त्रैलोक्यं सचराचरं ३३ ॐ ऐं दं नमः ततः क्रुद्धा जगन्माता चंडिका पानमुत्तमं पपौ पुनः पुनश्चैव जहासारुणलोचना ३४ ॐ ऐं क्षीं नमः ननर्द चासुरः सोपि बलवीर्य्यमदोद्धतः विषाणाभ्यां च चिक्षेप चंडिकां प्रति भूधरान् ३५ ॐ ऐं क्षीं नमः सा च तां प्रहितांस्तेन चूर्णयंती शरोत्करैः उवाच तं मदोद्धूतमुखरागाकुलाक्षरं ३६ ॐ ऐं श्रूं नमः देव्युवाच ३७ ॐ ऐं श्रौं नमः गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहं मया त्वयि हतेत्रैव गर्जिष्यंत्याशु देवता ३८ ॐ ऐं सां नमः ऋषिरुवाच ३९ ॐ ऐं श्रीं नमः एवमुक्त्वा समुत्पत्य सारूढा तं महासुरं पादेनाक्रम्य कंठे च शूलेनैनमताडयत् ४० ॐ ऐं ज्रं नमः ततः सोपि पदाक्रांतः तया निजमुखात्ततः

ॐ ऐंह्रीं नमः

अर्हंनिष्क्रान्तपवाति देव्या वीर्येण संहृतः ४१ अर्हंनिष्क्रान्तपवासौ युध्यमानो महास्वरः तया मह्लासिना देव्या शिरश्छित्वा निपातितः ४२ ॐ ऐं सां नमः ततो ह्राह्राकृतं सर्वं दैत्यसैन्यं ननाशतत् प्रहर्षं च परं जग्मुः सकला देवतागणाः ४३ ॐ ऐं श्रीं नमः तुष्टुवुस्तां सुरादेवीं सह दिव्यैर्महर्षिभिः जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ४४ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरवधो नाम तृतीयोध्यायः ३ सांगायै अष्टाविंशति वर्णात्मिकायै महालक्ष्म्यै महाहुतिं समर्पयामि नमः स्वाहा १ ॥

अथध्यानं कालाभ्राभांकटाक्षैररिकुलभयदांमौलिबद्धेंदुरेखां शंखंचक्रंकृ
पाणींत्रिशिखमपिकरैरुद्वहंतींत्रिनेत्रां सिंहस्कंधाधिरूढांत्रिभुवनमखिलंते
जसापूरयंती ध्यायेद्दुर्गांजयाख्यांत्रिदशपरिवृतांसेवितांसिद्धिकामैः ॐऐंसौं
नमः ऋषिरुवाच १ ॐऐंह्रींनमः शक्रादयःसुरगणानिहतेतिवीर्येतस्मिन्दु
रात्मनिसुरारिबलेचदेव्याः तांतुष्टुवुःप्रणतिनम्रशिरोधरांसावाग्भिःप्रहर्षपु
लकोद्गमचारुदेहाः २ ॐऐंश्रींनमः देव्याययाननमिदंजगदात्मशक्त्यानिःशेष
देवगणशक्तिसमूहमूर्त्या तामंबिकामखिलदेवमहर्षिपूज्यांभक्त्यानताःस्मवि
दधातुशुभानिसानः ३ ॐऐंयांनमः यस्याःप्रभावमतुलंभगवाननंतोब्रह्माहरश्च
नहिवक्तुमलंबलंच साचंडिकाखिलजगत्परिपालनायनाशायचाशुभभयस्य

४
उ.
१८

18

मतिं करोतु ४ ॐ ऐं ह्रूं नमः या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृति
धियां हृदयेषु बुद्धिः श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय दे
वि विश्वं ५ ॐ ऐं मैं नमः किं वर्णयाम तव रूपमचिन्त्यमेतत् किं चातिवीर्यमसुरक्षयका
रि भूरि किं चाहवेषु चरितानि तवाद्भुतानि सर्वेषु देव्यसुरदेवगणादिकेषु ६ ॐ ऐं
स्रूं नमः हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा स
र्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ७ ॐ ऐं श्रां
नमः यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि स्वाहा
सि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ८ ॐ ऐं ह्रूं नमः
या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः मोक्षार्थिभि

र्मुनिभिरस्तसमस्तदोषैर्विद्यासिसाभगवतीपरमाहिदेवि ९ ॐऐंह्रूंनमः शब्दा
त्मिकासुविमलर्ग्यजुषांनिधानमुद्गीथरम्यपदपाठवतांचसाम्नां देवीत्रयीभगवती
भवभावनायवार्तासिसर्वजगतांपरमार्त्तिहन्त्री १० ॐऐंह्रूंनमः मेधासिदेविविदिता
खिलशास्त्रसारादुर्गासिदुर्गभवसागरनौरसंगा श्रीकैटभारिहृदयैककृताधिवासा
गौरीत्वमेवशशिमौलिकृतप्रतिष्ठा ११ ॐऐंजुंनमः ईषत्सहासममलंपरिपूर्णचंद्रबिंबा
नुकारिकनकोत्तमकांतिकांतं अत्यद्भुतंप्रहृतमात्तरुषातथापिवक्त्रंविलोक्यसहसा।
महिषासुरेण १२ ॐऐंह्रूंनमः दृष्ट्वातुदेविकुपितंभ्रुकुटीकरालमुद्यच्छशांकसदृश
च्छवियन्नसद्यः प्राणान्मुमोचमहिषस्तदतीवचित्रंकैर्जीव्यतेहिकुपितांतकदर्शनेन १३
ॐऐंत्रैंनमः देविप्रसादपरमाभवतीभवायसद्योविनाशयसिकोपवतीकुलानि

विज्ञातमेनदधुनैवयदस्तमेतन्नीतंवलंसविपुलंमहिषासुरस्य १४ ॐ ऐं ह्रीं न।
मः तेसम्मताजनपदेषुधनानितेषांतेषांयशांसिनचसीदतिवंधुवर्गः यन्यास्तए
वनिभृतात्मजभृत्यदारायेषांसदाभ्युदयदाभवतीप्रसन्ना १५ ॐ ऐं श्रीं नमः धर्म्याणि
देविसकलानिसदैवकर्म्माण्यत्यादृतः प्रतिदिनंसुकृतीकरोति स्वर्गंप्रयातिचततोभ
वतीप्रसादाल्लोकत्रयेपिफलदाननुदेवितेन १६ ॐ ऐं ईं नमः दुर्गेस्मृताहरसिभीतिम
शेषजंतोः स्वस्थैः स्मृतामतिमतीवशुभांददासि दारिद्र्यदुःखभयहारिणिकात्वदन्यास
र्वोपकारकरणायसदार्द्रचित्ता १७ ॐ ऐं क्लां नमः एभिर्हतैर्जगदुपैतिसुखंतथैतेकुर्वं
तुनामनरकायचिरायपापं संग्राममृत्युमधिगम्यदिवंप्रयांतुमत्वेतिनूनमहितान्
विनिहंसिदेवि १८ ॐ ऐं क्लूं नमः दृष्ट्वैवकिंनभवतीप्रकरोतिभस्मसर्वासुरानरिषु

यत्प्रहिणोषिशस्त्रं लोकांप्रयांतुरिपवोपिहिशस्त्रपूता इत्थंमतिर्भवतितेष्वपि
तेतिसाध्वी १९ ॐ ऐं ह्लूं नमः खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकान्तिनि
वहेनदृशोसुराणां यन्नागताविलयमंशुमदिंदुखंडयोग्याननंतवविलोकयतां
तदेतत् २० ॐ ऐं क्रां नमः दुर्वृत्तवृत्तशमनंतवदेविशीलं रूपंतथैतदविचिन्त्यमतु
ल्यमन्यैः वीर्यंचहंतृहृतदेवपराक्रमाणां वैरिष्वपिप्रकटितैवदयात्वयेत्थं २१ ॐ
ऐं ह्लूं नमः केनोपमाभवतुतेस्यपराक्रमस्यरूपंचशत्रुभयकार्यतिहारिकुत्र चित्ते
कृपासमरनिष्ठुरताचदृष्टात्वय्येवदेविवरदेभुवनत्रयेपि २२ ॐ ऐं क्रें नमः त्रै।
लोक्यमेतदखिलंरिपुनाशनेनत्रातंत्वयासमरमूर्द्धनितेपिहत्वा नीतादिवंरिपुग
णाभयमप्यपास्तमस्माकमुन्मदसुरारिभवंनमस्ते २३ ॐ ऐं क्लीं नमः शूले

४
३.
२०

७०

नपाहिनोदेविपाहिखड्गेनचांविके घंटास्वनेननःपाहिचापज्यानिःस्वनेनच २४
ॐ ऐं ल्रूं नमः प्राच्यांरक्षप्रतीच्यांच चंडिकेरक्षदक्षिणे भ्रामणेनात्मशूलस्यउत्तर
स्यांतथेश्वरि २५ ॐ ऐं श्रीं नमः सौम्यानियानिरूपाणित्रैलोक्येविचरंतिते यानि
चात्यंतघोराणितैरक्षास्मांस्तथाभुवं २६ ॐ ऐं प्रौं नमः खड्गशूलगदादीनिया
निचास्त्राणितेंविके करपल्लवसंगीनितैरस्मान्रक्षसर्वतः २७ ॐ ऐं क्लौं नमः
ऋषिरुवाच २८ ॐ ऐं व्रीं नमः एवंस्तुतासुरैर्दिव्यैःकुसुमैर्नंदनोद्भवैः अर्चि
ताजगतांधात्रीतथागंधानुलेपनैः २९ ॐ ऐं क्लीं नमः भक्त्यासमस्तैस्त्रिदशै।
र्दिव्यैर्धूपैस्तुधूपिता प्राहप्रसादसुमुखीसमस्तान्प्रणतान्सुरान् ३० ॐ ऐं त्रों
नमः देव्युवाच ३१ ॐ ऐं स्लौं नमः व्रियतांत्रिदशाःसर्वेयदस्मत्तोभिवांछितं ३२

ॐ ऐं गीं नमः देवा ऊचुः ३३ ॐ ऐं हूं नमः भगवत्या कृतं सर्वं न किंचिदवशि

ष्यते ३४ ॐ ऐं ह्रीं नमः यदयं निहतः शत्रुरस्माकं महिषासुरः यदि चापि व

रो देयस्त्वयास्माकं महेश्वरि ३५ ॐ ऐं ह्सूं नमः संस्मृता संस्मृता त्वं नो हिंसेथाः

परमापदः यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ३६ ॐ ऐं श्रौं नमः तस्य वि

त्तर्द्धिविभवैर्धनदारादिसंपदां वृद्धयेस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ३७

ॐ ऐं — नमः ऋषिरुवाच ३८ ॐ ऐं श्रां नमः इति प्रसादिता देवैर्जगतोर्थे त

थात्मनः तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ३९ ॐ ऐं स्रौं नमः इ

त्येतत्कथितं भूप संभूता सा यथा पुरा देवी देवशरीरेभ्यो जगत्त्रयहितै

षिणी ४. ॐ ऐं प्रीं नमः पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् वधा

४
दु.
३१

यदुष्टदैत्यानांतथाशुम्भनिशुम्भयोः ४१ ॐऐंह्रींनमः रक्षणायचलोकानांदेवा
नामुपकारिणी तच्छृणुष्वमयाख्यातंयथावत्कथयामिते ४२ इतिमार्कण्डे
यपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येशक्रादिस्तुतिर्नामचतुर्थो
ध्यायः ४ ॥ सांगायै त्रिवर्णात्मिकायैत्रिशक्तिलक्ष्म्यैमहाहुतिंसम
र्पयामिनमःस्वाहा ४ ॥

२।

ॐ चंडिकामाहात्म्यतृतीयचरित्रस्य शुम्भनिशुम्भाभ्यामितिमंत्रस्य रु
द्र ऋषिः महासरस्वतीदेवता अनुष्टुप्छंदः भीमाशक्तिः भ्रामरीवीजं सूर्यस्त
त्वं महासरस्वतीप्रीत्यर्थं धर्मार्थकाममोक्षार्थे सामवेदमूर्तिजपेविनियोगः
अथध्यानं घंटाशूलहलानिशंखमुसलेचक्रंधनुःसायकं हस्ताब्जैर्दधतींघनां
तविलसच्छीतांशुतुल्यप्रभां गौरीदेहसमुद्भवांत्रिजगतामाधारभूतामहा स
र्वामत्रसरस्वतीमनुभजेशुम्भादिदैत्यार्दिनी ५ ॐ ऐंह्रीनमः ऋषिरुवाच १
ॐ ऐंह्रींनमः पुराशुम्भनिशुम्भाभ्यामसुराभ्यांशचीपतेः त्रैलोक्यंयज्ञभागाश्च
हृतामदबलाश्रयात् २ ॐ ऐंह्रींनमः तावेवसूर्यतांतद्वदधिकारंतथैंदवं कौ
वेरमथयाम्यंचचक्रातेवरुणस्यच ३ ॐ ऐंह्रीनमः तावेवपवनर्द्धिंचचक्रतु

५
ड॰
२२
२८

वैक्रिकर्मच ततोदेवाविनिर्द्धूता भ्रष्टराज्याः पराजिताः ४ ॐऐंत्रीं नमः स्वनाधि
कारास्त्रिदशास्ताभ्यांसर्वेनिराकृताः मह्यासुराभ्यांतोदेवीसंस्मरंत्यपराजिताम् ५
ॐऐंक्रींनमः तयास्माकंवरोदत्तोयथापत्सुस्मृताखिलाः भवतांनाशयिष्यामित
त्क्षणात्परमापदः ६ ॐऐंह्रींनमः इतिकृत्वामतिंदेवाहिमवंतंनगेश्वरं जग्मु
स्तत्रततोदेवीविष्णुमायांप्रतुष्टुवु ७ ॐऐंक्रींनमः देवाऊचुः ८ ॐऐंश्रींनमः
नमोदेव्यैमहादेव्यैशिवायैसततंनमः नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्म
ता ९ ॐऐंहूंनमः रौद्रायैनमोनित्यायैगौर्य्यैधात्र्यैनमोनमः ज्योत्स्नायैचेंदुरू
पिण्यैसुखायैसततंनमः १० ॐऐंक्लींनमः कल्याण्यैप्रणताहृद्ध्यैसिद्ध्यैकूर्म्यै
नमोनमः नैर्ऋत्यैभूभृतांलक्ष्म्यैशर्वाण्यैतेनमोनमः ११ ॐऐंॐनमः दुर्गायैदुर्गा

ॐ ऐं ह्रीं नमः

पारायै सारायै सर्वकारिण्यै ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः १२ ॐ ऐं ह्रीं नमः अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः १३ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता नमस्तस्यै १४ ॐ ऐं ह्रूं नमः नमस्तस्यै १५ ॐ ऐं ह्रौं नमः नमस्तस्यै नमो नमः १६ ॐ ऐं क्लीं नमः या देवी सर्वभूतेषु चेतनेत्यभिधीयते नमस्तस्यै १७ ॐ ऐं ह्रूं नमः नमस्तस्यै १८ ॐ ऐं ह्रीं नमः नमस्तस्यै नमो नमः १९ ॐ ऐं सौं नमः या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता नमस्तस्यै २० ॐ ऐं ह्लूं नमः नमस्तस्यै २१ ॐ ऐं ह्रूं नमः नमस्तस्यै नमो नमः २२ ॐ ऐं ह्रां नमः या देवी सर्वभूतेषु निद्रारूपेण संस्थिता नमस्तस्यै २३ ॐ ऐं स्कां नमः नमस्तस्यै २४ ॐ ऐं ह्रीं नमः नमस्तस्यै नमो नमः २५ ॐ ऐं ह्रौं नमः

४
३.
२३

23

यादेवीसर्वभूतेषुतृष्णारूपेणसंस्थिता नमस्तस्यै २६ ॐ ऐं स्रूं नमः नमस्तस्यै २७ ॐ ऐं ह्रूं नमः नमस्तस्यैनमोनमः २८ ॐ ऐं स्क्ष्रीं नमः यादेवीसर्वभूतेषुच्छायारूपेणसंस्थिता नमस्तस्यै २९ ॐ ऐं क्रौं नमः नमस्तस्यै ३० ॐ ऐं क्रों नमः नमस्तस्यैनमोनमः ३१ ॐ ऐं छ्रों नमः यादेवीसर्वभूतेषुशक्तिरूपेणसंस्थिता नमस्तस्यै ३२ ॐ ऐं स्लूं नमः नमस्तस्यै ३३ ॐ ऐं ल्क्रूं नमः नमस्तस्यैनमोनमः ३४ ॐ ऐं श्रां नमः यादेवीसर्वभूतेषुतृष्णारूपेणसंस्थिता नमस्तस्यै ३५ ॐ ऐं ल्क्षीं नमः नमस्तस्यै ३६ ॐ ऐं स्लूं नमः नमस्तस्यैनमोनमः ३७ ॐ ऐं त्स्लां नमः यादेवीसर्वभूतेषुक्षांतिरूपेणसंस्थिता नमस्तस्यै ३८ ॐ ऐं स्लीं नमः नमस्तस्यै ३९ ॐ ऐं सः नमः नमस्तस्यैनमोनमः ४० ॐ ऐं ल्लूं नमः यादेवीसर्वभूतेषुजातिरूपेणसंस्थिता

नमस्तस्यै ४१ ॐ ऐं ह्लं नमः नमस्तस्यै ४२ ॐ ऐं श्रूं नमः नमस्तस्यैनमोनमः
ॐ ऐं ज्रं नमः यादेवीसर्वभूतेषुलज्जारूपेणसंस्थिता नमस्तस्यै ४४ ॐ ऐं ह्लीं
नमः नमस्तस्यै ४५ ॐ ऐं स्कीं नमः नमस्तस्यैनमोनमः ४६ ॐ ऐं ह्रीं नमः यादे
वीसर्वभूतेषुशांतिरूपेणसंस्थिता नमस्तस्यै ४७ ॐ ऐं श्रूं नमः नमस्तस्यै ४८
ॐ ऐं ह्रूं नमः नमस्तस्यैनमोनमः ४९ ॐ ऐं ह्लीं नमः यादेवीसर्वभूतेषुश्रद्धा
रूपेणसंस्थिता नमस्तस्यै ५० ॐ ऐं क्लूं नमः नमस्तस्यै ५१ ॐ ऐं ल्लूं नमः न
मस्तस्यैनमोनमः ५२ ॐ ऐं द्रां नमः यादेवीसर्वभूतेषुकांतिरूपेणसंस्थिता
नमस्तस्यै ५३ ॐ ऐं गां नमः नमस्तस्यै ५४ ॐ ऐं सं नमः नमस्तस्यैनमोनमः ५५
ॐ ऐं ल्क्षां नमः यादेवीसर्वभूतेषुलक्ष्मीरूपेणसंस्थिता नमस्तस्यै ५६ ॐ ऐं श्री

५
दु.
२४

नमः नमस्तस्यै ५७ ॐ ऐं ह्रां नमः नमस्तस्यै नमो नमः ५८ ॐ ऐं ह्रूं नमः या
देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता नमस्तस्यै ५९ ॐ ऐं क्रें नमः नमस्तस्यै ६०
ॐ ऐं यां नमः नमस्तस्यै नमो नमः ६१ ॐ ऐं ह्लीं नमः या देवी सर्वभूतेषु स्मृति
रूपेण संस्थिता नमस्तस्यै ६२ ॐ ऐं ह्रां नमः नमस्तस्यै ६३ ॐ ऐं ह्रौं नमः नम

७५

स्तस्यै नमो नमः ६४ ॐ ऐं ह्रूं नमः या देवी सर्वभूतेषु दयारूपेण संस्थिता
नमस्तस्यै ६५ ॐ ऐं ह्रूं नमः नमस्तस्यै ६६ ॐ ऐं नं नमः नमस्तस्यै नमो नमः

६७

ॐ ऐं स्त्रां नमः या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता नमस्तस्यै ६८ ॐ ऐं वं
नमः नमस्तस्यै ६९ ॐ ऐं मं नमः नमस्तस्यै नमो नमः ॐ ऐं ह्लीं नमः ७० या दे
वी सर्वभूतेषु मातृरूपेण संस्थिता नमस्तस्यै ७१ ॐ ऐं श्रां नमः नमस्तस्यै ७२

ॐ ऐं लं नमः नमस्तस्यै नमो नमः ७३ ॐ ऐं भें नमः या देवी सर्वभूतेषु भ्रांति
रूपेण संस्थिता नमस्तस्यै ७४ ॐ ऐं न्नूं नमः नमस्तस्यै ७५ ॐ ऐं स्हौं नमः न
मस्तस्यै नमो नमः ७६ ॐ ऐं ईं नमः इंद्रियाणामधिष्ठात्री भूतानां चाखिलेषु या
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ७७ ॐ ऐं चं नमः चितिरूपेण या कृत्स्न
मेतद्व्याप्य स्थितं जगत् नमस्तस्यै ७८ ॐ ऐं ल्क्रीं नमः नमस्तस्यै ७९ ॐ ऐं क्ष्रीं नमः
नमस्तस्यै नमो नमः ८० ॐ ऐं ह्स्रीं नमः स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेन्द्रे
ण दिनेषु सेविता करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहंतु चापदः ८१
ॐ ऐं ह्सूं नमः या सांप्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते या च
स्मृता तत्क्षणमेव हंति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ८२ ॐ ऐं श्रौं नमः ऋषि रु

५
उ.
१५
25

वाच ८३ ॐ ऐं ह्रीं नमः एवं स्तवाभियुक्तानां देवानां तत्र पार्वती स्नातुमभ्याययौ
तोये जाह्नव्या नृपनंदन ८४ साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेऽत्र का शरीर
कोशात्तस्यास्याः समुद्भूताब्रवीच्छिवा ८५ ॐ ऐं क्लीं नमः स्तोत्रं ममैतत्क्रियते
शुंभदैत्यनिराकृतैः देवैः समस्तैः समरे निशुंभेन पराजिते ८६ ॐ ऐं श्रां नमः शा
रीरकोशाद्यतस्तस्याः पार्वत्या निःसृताम्बिका कौशिकीति समस्तेषु ततो लोकेषु
गीयते ८७ ॐ ऐं क्रूं नमः तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती कालिके
ति समाख्याता हिमाचलकृताश्रया ८८ ॐ ऐं ह्रूं नमः ततोऽम्बिकां परं रूपं बिभ्राणां
सुमनोहरं ददर्श चंडो मुंडश्च भृत्यौ शुंभनिशुंभयोः ८९ ॐ ऐं ड्रूं नमः ताभ्यां शुंभाय
चाख्याता अतीव सुमनोहरा काप्यास्ते स्त्री महाराज भासयंती हिमाचलं ९०

सुं

ॐ पें ज्ञां नमः नैव ताट्टक्क्वचिद्रूपं दृष्टं केन विद्रुत्तमं स्नायत्नां काप्यसौ देवी शृ
ह्वतां वसुरेश्वर ॥ ११ ॐ पें ज्ञूं नमः स्त्रीरत्नमति चार्वंगी द्योतयंती दिशस्त्विषा
सात्र तिष्ठति देवेंद्र तां भवान्द्रष्टुमर्हति ॥ १२ ॐ पें क्रीं नमः यानि रत्नानि मणयो ग
जाश्वादीनि वै प्रभो त्रैलोक्ये तु समस्तानि सांप्रतं भांति तेश्रहे ॥ १३ ॐ पें क्रौं नमः
ऐरावतः समानीतो गजरत्नं पुरंदरात् पारिजाततरुश्चायं तथैवोच्चैः श्रवा ह
यं ॥ १४ ॐ पें वौं नमः विमानं हंससंयुक्तमेतत्तिष्ठति तेंगने रत्नभूतमिहानीतं
यदासीद्वेधसोद्भुतं ॥ १५ ॐ पें ग्लैं नमः निधिरेष महापद्मः समानीतो धनेश्वरात्
किंजल्किनीं ददौ चाब्धिर्मालामम्लानपंकजां ॥ १६ ॐ पें ह्रीं नमः छत्रं तेवारुणं गे
हे कांचनस्रावि तिष्ठति तथायं स्यंदनवरो यः पुरासीत्प्रजापते ॥ १७ ॐ पें रं नमः

५
उ.
२६

७८

मृत्योरुत्क्रांतिदानामशक्तिरीशत्वयाहृता पाशःसलिलराजस्यभ्रातुस्तवपरिग्रहे ९८ ॐ ऐं ह्लें नमः निशुंभस्याब्धिजाताश्चसमस्तारत्नजातयः वह्निरपिददौतुभ्यमग्निशौचेचवाससी ९९ ॐ ऐं स्रूं नमः एवंदैत्येंद्ररत्नानिसमस्तान्याहृतानिते स्त्रीरत्नमेषाकल्याणीत्वयाकस्मान्नगृह्यते १०० ॐ ऐं शौं नमः ऋषिरुवाच १०१ ॐ ऐं श्रीं नमः निशम्येतिवचःशुंभःसतदाचंडमुंडयोः प्रेषयामाससुग्रीवंदूतंदेव्यामहासुरं २ ॐ ऐं ॐ नमः इतिचेतिचवक्तव्यासागतावचनान्मम यथाचाभ्येतिसंप्रीत्यातथाकार्यंत्वयालघु ३ ॐ ऐं ल्लूं नमः सतत्रगत्वायत्रास्तेशैलोद्देशेतिशोभने सादेवीतांततःप्राहश्लक्ष्णंमधुरयागिरा १०४ ॐ ऐं ह्रूं नमः दूतउवाच १०५ ॐ ऐं ह्रीं नमः देविदैत्येश्वरःशुंभःस्त्रैलोक्यपरमेश्वरः दूतोहंप्रेषितस्तेनत्वत्सकाशमिहागतः १०६ ॐ ऐं स्क्रीं नमः

अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु निर्जिताखिलदैत्यारिः स यदाहं स्पृहे
ष्टतत् १७ ॐ ऐं ह्सूं नमः मम त्रैलोक्यमखिलं मम देवा वशानुगाः यज्ञभागानहं स
र्वानुपाश्नामि पृथक्पृथक् १८ ॐ ऐं ह्स्त्रीं नमः त्रैलोक्ये वररत्नानि मम वश्यान्यशेष
तः तथैव गजरत्नं च हृत्वा देवेंद्रवाहनं १९ ॐ ऐं ग्रां नमः क्षीरोदमथनोद्भूतमा
श्वरत्नं ममामरैः उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितं ११० ॐ ऐं ह्सूं नमः यानि चा
न्यानि देवेषु गंधर्वेषूरगेषु च रत्नभूतानि भूतानि तानि मय्येव शोभने १११ ॐ ऐं
ह्सूं नमः स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयं सा त्वमस्मानुपागच्छ यतो रत्न
भुजो वयं ११२ ॐ ऐं ह्स्रां नमः मां वा ममानुजं वापि निशुंभमुरुविक्रमं भज त्वं चंचलापा
ंगि रत्नभूतासि वै यतः ११३ ॐ ऐं स्रौं नमः परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात्

५
दु.
१०
27

एतद्बुद्ध्वासमालोच्यमत्परिग्रहतांव्रज १४ ॐऐंस्त्रेंनमः ऋषिरुवाच १५ ॐऐं
क्रींनमः इत्युक्तासातदादेवीगंभीरांतःस्मिताजगौ दुर्गाभगवतीभद्राययेदंधार्य्य
तेजगत् ११६ ॐऐंश्रींनमः देव्युवाच ७ ॐऐंक्रींनमः सत्यमुक्तंत्वयानात्रमिथ्या
किंचित्त्वयोदितं त्रैलोक्याधिपतिःशुंभोनिशुंभश्चापितादृशः ११८ ॐऐंहूंनमः
किंत्वत्रयत्प्रतिज्ञातंमिथ्यातत्क्रियतेकथं श्रूयतामल्पबुद्धित्वात्प्रतिज्ञायाकृ
तापुरा ११९ ॐऐंब्रूंनमः योमांजयतिसंग्रामेयोमेदर्पंव्यपोहति योमेप्रतिबलो
लोकेसमेभर्त्ताभविष्यति १२० ॐऐंश्लूंनमः तदागच्छतुशुंभोत्रनिशुंभोवामहा
सुरः मांजित्वाकिंचिरेणात्रपाणिंगृह्णातुमेलघु १२१ ॐऐंकंनमः दूतउवाच १२२
ॐऐंद्रेंनमः अवलिप्तासिमैवंत्वंदेविब्रूहिममाग्रतः त्रैलोक्येकःपुमांस्तिष्ठेदग्रे

ॐ ऐं ह्रीं नमः

शुंभनिशुंभयो ९३ ॐ ऐं श्रीं नमः अन्येषामपि दैत्यानां सर्वे देवा न वै युधि तिष्ठंति सं
मुखे देवि किं पुनः स्त्री त्वमेकिका ९४ ॐ ऐं कौं नमः इंद्राद्याः सकला देवास्तस्थुर्येषां
न संयुगे शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखे ९५ सा त्वं गच्छ मयैवोक्ता पार्श्वं शुं
भनिशुंभयोः केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ९६ ॐ ऐं ऐं नमः देव्युवाच ९७
ॐ ऐं स्क्रीं नमः एवमेतद्बली शुंभो निशुंभश्चातिवीर्यवान् किं करोमि प्रतिज्ञा मे यदना
लोचितापुरा ९८ ॐ ऐं श्रौं नमः स त्वं गच्छ मयैवोक्तं यदेतत्सर्वमादृतः तदाचक्ष्वासुरेंद्रा
य स च युक्तं करोतु तत् ९९ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये
दूतसंवादो नाम पंचमोऽध्यायः ५ सांगायै विष्णुमायादित्रयोविंशति देवतायै म
हाहुतिं समर्पयामि नमः स्वाहा ५ ॥

६
दु.
२८
२४

अथ ध्यानं सिंहस्था शशिशेखरा मरकतप्रख्या चतुर्भिर्भुजैः शंखंचक्रधनुःशरां
श्च दधती नेत्रैस्त्रिभिः शोभिता आमुक्तांगदहारकंकणरणत्कांचीक्वणन्नूपुरा दुर्गा
दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुंडला ॐ ऐं ॐ नमः ऋषिरुवाच १ ॐ ऐं ह्रूं नमः
इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः समाचष्ट समागम्य दैत्यराजाय विस्तरात् २
ॐ ऐं क्रों नमः तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः सक्रोधः प्राह दैत्यानाम
धिपं धूम्रलोचनं ३ ॐ ऐं श्रों नमः हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः तामा
ॐ ऐं ह्रीं नमः
नय बलाद्दुष्टां केशाकर्षणविह्वलां ४ तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठते परः
स हंतव्योऽमरो वापि यक्षो गंधर्व एव वा ५ ॐ ऐं क्लीं नमः ऋषिरुवाच ६ ॐ ऐं श्रीं न
मः तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः वृतः षष्ट्या सहस्राणामसुराणां द्रुत

ययौ ७ ॐ ऐं ह्रीं नमः सदृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थितां जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ८ ॐ ऐं ह्रौं नमः न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ततो बलान्नयाम्येष केशाकर्षणविह्वलां ९ ॐ ऐं श्रौं नमः देव्युवाच १० ॐ ऐं ऐं नमः दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः बलान्नयसि मामेवं ततः किं ते करोम्यहं ११ ॐ ऐं औं नमः ऋषिरुवाच १२ ॐ ऐं श्रीं नमः इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः हुंकारेणैव तं भस्म सा चकाराम्बिका ततः १३ ॐ ऐं क्लूं नमः अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः १४ ॐ ऐं क्लूं नमः ततो धुतसटः कोपात्कृत्वा नादं सुभैरवं पपातासुरसेनायां सिंहो देव्याः स्ववाहनं १५ ॐ ऐं ब्लूं नमः कांश्चित्करप्रहारेण दैत्यानास्येन चापरान्

आक्रान्ताश्चापरेणान्यान्स जघान महासुरान् १६ ॐ ऐं स्त्रीं नमः केषांचित्पाटयामास नखैः कोष्ठानि केसरी तथा तलप्रहारेण शिरांसि कृतवान्पृथक् १७ ॐ ऐं ह्लूं नमः विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः १८ ॐ ऐं सौं नमः क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना तेन केसरिणा देव्या वाहनेनातिकोपिना १९ ॐ ऐं ह्सौं नमः श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनं बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः २० ॐ ऐं क्रूं नमः चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ २१ ॐ ऐं ह्सौं नमः हे चण्ड हे मुण्ड बलैर्बहुलैः परिवारितौ तत्र गच्छत गत्वा च सा समानीयतां लघु २२ ॐ ऐं श्रीं नमः केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि त

६
दु०
२९
29

दाशेषायुधैः सर्वैरसुरैर्विनिहन्यतां २३ ॐ ऐं ह्रीं नमः तस्याहतायां दुष्टायां
सिंहेन विनिपातिते शीघ्रमागम्यतां बध्वा गृहीत्वा तमथाम्बिका २४ इतिमा
र्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये धूम्रलोचनवधो नाम षष्ठोऽध्या
यः ६ सांगायै शान्तायै धूम्राक्ष्यै महाहुतिं समर्पयामि नमः स्वाहा ॥ ६

७
डु.
३०

30

अथध्यानं ध्यायेयं रत्नपीठे शुककलपठितं शृण्वतीं श्यामलांगीं न्यस्तैकांघ्रिं सरोजे
शशिशकलधरां वल्लकीं वादयंतीं कह्लाराबद्धमालां नियमितविलसच्चूलिकां रक्त
वस्त्रां मातंगीं शंखपात्रां मधुमदविवशां चित्रकोद्भासिभालां ७ ॐ ऐं ॐ नमः ऋषिरुवा
च १ ॐ ऐं ह्रीं नमः आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः चतुरंगबलोपेता ययुरभ्यु
द्यतायुधाः २ ॐ ऐं ह्रूं नमः ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थितां सिंहस्योपरि शै
लेंद्रशृंगे महति कांचने ३ ॐ ऐं भ्रूं नमः ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः आ
कृष्टचापासिधरास्तथान्ये तत्समीपगाः ४ ॐ ऐं ह्रौं नमः ततः कोपं चकारोच्चैरंबिका
तानरीन्प्रति कोपेन चास्या वदनं मषीवर्णमभूत्तदा ५ ॐ ऐं ह्रौं नमः भ्रुकुटीकुटिलात्त
स्या ललाटफलकाद्द्रुतं कालीकरालवदना विनिष्क्रान्तासिपाशिनी ६ ॐ ह्रूं नमः वि

चित्रखट्वांगधराननरमालाविभूषणा द्वीपिचर्मपरीधानाशुष्कमांसातिभैरवा ७ ॐ

ऐंक्लूंनमः अतिविस्तारवदनाजिह्वाललनभीषणा निमग्नारक्तनयनानादापूरित

दिङ्मुखा ८ ॐऐंक्लैंनमः सावेगेनाभिपतितायातयंतीमहासुरान् सैन्येतत्रसुरा

रीणामभक्षयततद्बलं ९ ॐऐंनंनमः पार्ष्णिग्राहांकुशग्राहियोधघंटासमन्विता समा

दायैकहस्तेन मुखेचिक्षेपवारणान् १० ॐऐंलूंनमः तथैवयोधंतुरंगैरथंसारथिना

सह निक्षिप्यवक्त्रेदशनैश्चर्वयत्यतिभैरवं ११ ॐऐंत्व्रींनमः एकंजग्राहकेशेषुग्रीवा

यामथचापरं पादेनाक्रम्यचैवान्यसुरस्तान्यमपोथयत् १२ ॐऐंज्लूंनमः तैर्मुक्तानिचशस्त्रा

णिमहास्त्राणितथासुरैः मुखेनजग्राहरुषादशनैर्मथितान्यपि १३ ॐऐंशंनमः बलिनातद्बलंसर्वमसुराणांमहात्मनां ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा १४ ॐऐंस्लूंनमः

उ॰
३१
३।

असिनानिहताः केचित्केचित्खट्वांगताडिताः जग्मुर्विनाशमसुरा दंताग्राभिहतास्तथा १५ ॐ ऐं ह्रीं नमः क्षणेन तद्बलं सर्वमसुराणां निपातितं दृष्ट्वा चंडोभिदुद्राव तां कालीमतिभीषणां १६ ॐ ऐं ह्रीं नमः शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः छादयामास चक्रैश्च मुंडः क्षिप्तैः सहस्रशः १७ ॐ ऐं ह्रीं नमः तानि चक्राण्यनेकानि विशमानानि तन्मुखं बभुर्यथार्कबिंबानि सुबहूनि घनोदरं १८ ॐ ऐं ॐ नमः ततो जहासातिरुषा भीमं भैरवनादिनी काली करालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला १९ ॐ ऐं ह्रीं नमः उत्थाय च महासिं हं देवी चंडमधावत गृहीत्वा चास्य केशेषु शिरस्तेनासिनाछिनत् २० ॐ ऐं ह्रीं नमः अथ मुंडोभ्यधावत्तां दृष्ट्वा चंडं निपातितं तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा २१ ॐ ऐं सौः नमः हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितं मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं

ॐ ऐं ह्रीं नमः शिरश्चंडस्य कालेच गृहीत्वा मुंडमेवच प्राह प्रचंडाट्टहासमिश्रमभ्ये
ति चंडिकां २३ ॐ ऐं ह्रीं नमः मयातवात्रोपहृतौ चंडमुंडौ महापशू युद्धयज्ञे स्वयं शु
म्भं निशुम्भं च हनिष्यसि २४ ॐ ऐं ह्रीं नमः ऋषिरुवाच २५ ॐ ऐं ह्रीं नमः तावानीतौ
ततो दृष्ट्वा चंडमुंडौ महासुरौ उवाच काली कल्याणी ललितं चंडिका वचः २६ ॐ ऐं ह्रीं
नमः यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता चामुंडेति ततो लोके ख्याता देवि भविष्यसि २७
इति मार्कंडेय पुराणे सावर्णिके मन्वंतरे देवी माहात्म्ये चंडमुंडवधो नाम सप्तमोध्या
यः ७ सांगायै कर्प्पूरबीजाधिष्ठात्र्यै कालीचामुंडादेव्यै महाहुतिं समर्पयामि नमः
स्वाहा ७ ॥

ड. ३१

अथध्यानं नागाधीश्वरविष्टरां फणिफणोत्तंसोरुरत्नावलीभास्वद्देहलतां दिवाक
रनिभां नेत्रत्रयोद्भासितां मालाकुंभकपालनीरजकरां चंद्रार्धमौलिं परां सर्वज्ञेश्वर
भैरवांकनिलयां पद्मावतीं चिंतये ८ ॐ ऐं ह्लीं नमः ऋषिरुवाच १ ॐ ऐं ह्रें नमः चंडे
च निहते दैत्ये मुंडे च विनिपातिते बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः २ ॐ ऐं ऐं नमः
ततः कोपपराधीनचेताः शुंभः प्रतापवान् उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह

३

ॐ ऐं क्रौं नमः अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः कंबूनां चतुराशीतिर्निर्यांत
स्वबलैर्वृताः ४ ॐ ऐं ईं नमः कोटिवीर्याणि पंचाशदसुराणां कुलानि वै शतं कुलानि
धौम्राणां निर्गच्छंतु ममाज्ञया ५ ॐ ऐं क्लूं नमः कालका दौर्हृदा मौर्याः कालकेयास्तथा
सुराः युद्धाय सज्जा निर्यांतु आज्ञया त्वरिता मम ६ ॐ ऐं ह्स्रीं नमः इत्याज्ञाप्यासुरप।

तिः शुम्भो भैरवशासनः निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ७ ॐ ऐं फ्रें नमः
आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणं ज्यास्वनैः पूरयामास धरणीगगनान्तरं ८ ॐ
ऐं ह्रूं नमः ततः सिंहो महानादमतीव कृतवान्नृप घण्टास्वनेन तन्नादानम्बिका चोपबृं
हयत् ९ ॐ ऐं ज्रौं नमः धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा निनादैर्भीषणैः काली
जिग्ये विस्तारितानना १० ॐ ऐं ह्रूं नमः तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशं देवीसिं
हस्तथा काली सरोषैः परिवारिताः ११ ॐ ऐं फ्रौं नमः एतस्मिन्नन्तरे भूप विनाशाय सुर
द्विषां भवायामरसिंहानामतिवीर्यबलान्विताः १२ ॐ ऐं स्त्रौं नमः ब्रह्मेशगुहविष्णूनां
तथैवेन्द्रस्य च शक्तयः शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः १३ ॐ ऐं ह्लौं नमः यस्य देवस्य
यद्रूपं यथाभूषणवाहनं तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ १४ ॐ ऐं स्रौं नमः हंस

८
३.
३३
33

युक्तविमानाग्रे साक्षसूत्रकमंडलुः आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते १५
ॐ ऐं ग्रीं नमः माहेश्वरी वृषारूढा त्रिशूलवरधारिणी महाहिवलया प्राप्ता चंद्ररेखावि
भूषणा १६ ॐ ऐं स्हां नमः कौमारी शक्तिहस्ता च मयूरवरवाहना योद्धुमभ्याययौ दैत्या
नंबिका गुहरूपिणी १७ ॐ ऐं स्हें नमः तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता शंखचक्र
गदाशार्ङ्गखड्गहस्ताभ्युपाययौ १८ ॐ ऐं स्हीं नमः यज्ञवाराहमतुलं रूपं या बिभ्रतो ह
रेः शक्तिः साप्याययौ तत्र वाराही बिभ्रती तनुं १९ ॐ ऐं ह्रौं नमः नारसिंही नृसिंहस्य बि
भ्रती सदृशं वपुः प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहति २० ॐ ऐं वीं नमः वज्रहस्ता तथै
वैंद्री गजराजोपरिस्थिता प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा २१ ॐ ऐं ल्हूं नमः ततः प
रिवृतस्ताभिरीशानो देवशक्तिभिः हन्यतामसुराः शीघ्रं मम प्रीत्याह चंडिका २२ ॐ ऐं स्हां नमः

ततोदेवीशरीरात्तुविनिष्क्रान्तातिभीषणा चंडिकाशक्तिरत्युग्राशिवाशतनिनादिनी २ ३
ॐ ऐं ह्रीं नमः सावाहधूम्रजटिलमीशानमपराजिता दूतत्वंगच्छभगवन्पार्श्वंशुम्भनिशुंभ
योः २४ ॐ ऐं ह्रां नमः ब्रूहिशुम्भंनिशुंभंचदानवावतिगर्वितौ येचान्येदानवास्तत्रयुद्धाय
समुपस्थिताः २५ ॐ ऐं ब्रें नमः त्रैलोक्यमिन्द्रोलभतांदेवाःसन्तुहविर्भुजः यूयंप्रयातपा
तालंयदिजीवितुमिच्छथ २६ ॐ ऐं ह्रीं नमः बलावलेपादथचेद्भवन्तोयुद्धकांक्षिणः त
दागच्छततृप्यन्तुमच्छिवाःपिशितेनवः २७ ॐ ऐं ह्रूं नमः यतोनियुक्तोदौत्येनतयादेव्या
शिवःस्वयं शिवदूतीतिलोकेस्मिंस्ततःसाख्यातिमागता २८ ॐ ऐं ह्रीं नमः तेपिश्रुत्वावचो
देव्याःशर्वाख्यातंमहासुराः अमर्षापूरिताजग्मुर्यतःकात्यायनीस्थिता २९ ॐ ऐं श्रीं नमः ततः
प्रथममेवाग्रेशरशक्त्यृष्टिवृष्टिभिः ववर्षुरुद्धतामर्षास्तांदेवीममरारयः ३० ॐ ऐं ह्रीं नमः

दु. ३४

34

साचतान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान् चिच्छेदलीलयाध्मातधनुर्मुक्तै
र्महेषुभिः ३१ ॐ ऐं क्रौं नमः तस्याग्रतस्तथा कालीशूलपातविदारितान् ख
ट्वाङ्गपोथितांश्चारीन्कुर्वती व्यचरत्तदा ३२ ॐ ऐं ह्रूं नमः कमण्डलुजलाक्षेप
हतवीर्यान्हतौजसः ब्रह्माणी चाकरोच्छत्रून्येन येन स्म धावति ३३ ॐ ऐं क्रूं नमः
माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी दैत्याञ्जघान कौमारी तथा शक्त्याति
कोपना ३४ ॐ ऐं ल्हूं नमः ऐन्द्री कुलिशपातेन शतशो दैत्यदानवाः पेतुर्विदारि
ताः पृथ्व्यां रुधिरौघप्रवर्षिणः ३५ ॐ ऐं ह्लां नमः तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्ष
तवक्षसः वाराहमूर्त्या न्यपतंश्चक्रेण च विदारितान् ३६ ॐ ऐं ह्रूं नमः नखैर्विदारि
तांश्चान्यान्भक्षयन्ती महासुरान् नारसिंही चचाराजौ नादापूर्णदिगम्बरा ३७

ॐ ऐं ह्रं नमः चंडाट्टहासैरसुराः शिवदूत्याभिदूषिताः पेतुः पृथिव्यांप
तितांस्तांश्चखादाथसातदा ३८ ॐ ऐं स्लूं नमः इतिमातृगणंक्रुद्धं मर्दयंतंम
हासुरान् दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ३९ ॐ ऐं औं नमः पला
यनपरान्दृष्ट्वादैत्यान्मातृगणार्दितान् योद्धुमभ्याययौक्रुद्धोरक्तबीजोमहा
सुरः ४० ॐ ऐं क्रां नमः रक्तबिंदुर्यदाभूमौपतत्यस्यशरीरतः समुत्पततिमे
दिन्यांतत्प्रमाणोमहासुरः ४१ ॐ ऐं य्लीं नमः युयुधेसगदापाणिरिंद्रश
क्त्यामहासुरः ततश्चैंद्रीस्ववज्रेणरक्तबीजमताडयत् ४२ ॐ ऐं त्स्रीं नमः
कुलिशेनाहतस्याशुतस्यसुस्रावशोणितं समुत्तस्थुस्ततोयोधास्तद्रूपास्त
त्पराक्रमाः ४३ ॐ ऐं ष्ट्रीं नमः यावंतःपतितास्तस्यशरीराद्रक्तबिंदवः ता

८
दु॰
३५

३०

वंतः पुरुषाजातास्तद्वीर्यबलविक्रमः ४४ ॐ ऐं स्क्लीं नमः ते चापि युयुधुस्तत्र
पुरुषारक्तसंभवाः समंमातृभिरत्युग्रशस्त्रपातातिभीषणं ४५ ॐ ऐं ग्लौं नमः
पुनश्चवज्रपातेनक्षतमस्यशिरोयदा ववाहरक्तंपुरुषास्ततोजाताःसहस्र
शः ४६ ॐ ऐं क्लौं नमः वैष्णवीसमरेचैनंचक्रेणाभिजघानह गदयाताडयामा
सऐंद्रीतमसुरेश्वरं ४७ ॐ ऐं ग्रों नमः वैष्णवीचक्रभिन्नस्यरुधिरस्रावसंभवैः
सहस्रशोजगद्व्याप्तंतत्प्रमाणैर्महासुरैः ४८ ॐ ऐं त्रीं नमः शक्त्याजघानकौमा
रीवाराहीचतथासिना माहेश्वरीत्रिशूलेनरक्तबीजमहासुरं ४९ ॐ ऐं क्लीं नमः
सचापिगदयादैत्यःसर्वाएवाहनत्पृथक् मातृकोपसमाविष्टोरक्तबीजोमहासुरः ५०
ॐ ऐं त्स्वीं नमः तस्याहतस्यबहुधाशक्तिशूलादिभिर्भुवि पपातयोवैरक्तौघस्तेना

संशतशोसुराः ५१ ॐऐंक्लींनमः तैश्चासुरासृक्संभूतैरसुरैः सकलंजगत् व्याप्त
मासीत्ततोदेवीभयमाजग्मुरुत्तमं ५२ ॐऐंस्त्रूंनमः तान्विषण्णान्सुरान्दृष्ट्वाचंडि
काप्राहसत्वरा उवाचकालींचामुंडेविस्तरंवदनंकुरु ५३ ॐऐंक्लैंनमः मच्छस्त्रपातसं
भूतान्रक्तविंदून्महासुरान् रक्तविंदोःप्रतीछत्वंवक्त्रेणानेनवेगिना ५४ ॐऐंझ्रूंनमः
भक्षयंतीचररणेतदुत्पन्नान्महासुरान् एवमेषक्षयंदैत्यःक्षीणरक्तोगमिष्यति ५५ ॐ
ऐंसौंःनमः भक्ष्यमाणास्त्वयाचोग्रानचोत्पत्स्यंतिचापरे इत्युक्त्वातांततोदेवीशूलेना
भिजघानतं ५६ ॐऐंश्रींनमः मुखेनकालीजगृहेरक्तवीजस्यशोणितं ततोसावाज
घानाथगदयातत्रचंडिका ५७ ॐऐंस्रूंनमः नचास्यावेदनांचक्रेगदापातोल्पिकामपि
तस्याहतस्यदेहात्तुवहुसुस्रावशोणितं ५८ ॐऐंद्रंनमः यतस्ततस्तद्वक्त्रेणचामुंडा

८
दु.
३६

36

संप्रतीछति मुखेसमुद्गतायेस्यारक्तपातान्महासुराः ५९ ॐऐंजंसांनमः तांश्चखादाथवा
मुंडापपौतस्यचशोणितं देवीशूलेनवज्रेणवाणैरसिभिऋष्टिभिः ६० ॐऐंसंक्लींनमः जघा
नरक्तवीजंतंचामुंडापीतशोणितं सपपातमहीपृष्टेशास्त्रसंघसमाहतः ६१ ॐऐंसंक्लीं
नमः नीरक्तश्चमहीपालरक्तवीजोमहासुरः ततस्तेहर्षमतुलमवापुस्त्रिदशान्नृप ६२
ॐऐंश्रींनमः तेषांमातृगणोजातोननर्तासृङ्मदोद्धतः ६३ इतिमार्कंडेयपुराणेसावर्णि
केमन्वंतरेदेवीमाहात्म्येरक्तवीजवधोनामाष्टमोध्यायः ८ सांगायै अष्टमातृकास
हितायैरक्ताक्षैमहाहुतिंसमर्पयामिनमःस्वाहा ८

अथ ध्यानं उत्तप्तकांचननिभं रुचिराक्षमालां पाशांकुशौ च वरदं निजबाहुदण्डैः वि
भ्राणमिन्दुशकलाभरणं त्रिनेत्रमर्धाम्बिकेशमनिशं वपुराश्रयामि ९ ओं ऐं ह्लीं नमः
राजोवाच १ ओं ऐं श्रौं नमः विचित्रमिदमाख्यातं भगवन्भवता मम देव्याश्चरितमाहा
त्म्यं रक्तबीजवधाश्रितं २ ओं ऐं प्रौं नमः भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते चका
र शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ३ ओं ऐं ह्रीं नमः ऋषिरुवाच ४ ओं ऐं क्रौं नमः
चकार कोपमतुलं रक्तबीजे निपातिते शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ५ ओं
ऐं क्लौं नमः हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् अभ्यधावन्निशुम्भोऽथ मुख्ययासु
रसेनया ६ ओं ऐं ईं नमः तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः संदष्टौष्ठपुटाः क्रु
द्धा हन्तुं देवीमुपाययुः ७ ओं ऐं ह्रूं नमः आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः निहं

९
उ,
३०

तेचंडिकाकोपात्कृत्वायुद्धंतुमातृभिः ८ ॐऐंश्रांनमः ततोयुद्धमतीवासीद्देव्याःशुं
भनिशुंभयोः शरवर्षमतीवोग्रंमेघयोरिववर्षतोः ९ ॐऐंल्लांनमः चिच्छेदास्ता
ञ्छरांस्ताभ्यांचंडिकास्वशरोत्करैः ताडयामासचांगेषुशस्त्रौघैरसुरेश्वरौ १० ॐऐंश्रांन
मः निशुंभोनिशितंखड्गंचर्मचादायसुप्रभं अताडयन्मूर्ध्निसिंहंदेव्यावाहनमुत्तमं ११
ॐऐंश्रींनमः ताडितेवाहनेदेवीक्षुरप्रेणासिमुत्तमं निशुंभस्याशुचिच्छेदचर्मचाप्य
ष्टचंद्रकं १२ ॐऐंक्रौंनमः छिन्नेचर्मणिखड्गेचशक्तिंचिक्षेपसोसुरः तामप्यस्यद्विधा
चक्रेचक्रेणाभिमुखागतां १३ ॐऐंघ्रूंनमः कोपाध्मातोनिशुंभोथशूलंजग्राहदानवः
आयांतंमुष्टिपातेनदेवीतच्चाप्यचूर्णयत् १४ ॐक्लींनमः आविध्याथगदांसोपिचिक्षे
पचंडिकांप्रति सापिदेव्यात्रिशूलेनभिन्नाभस्मत्वमागता १५ ॐऐंश्रूंनमः ततःपर

शुहस्तंतमायांतंदैत्यपुंगवं आहत्यदेवीबाणौघैरपातयतभूतले १६ ॐऐंह्रींनमः
तस्मिन्निपतितेभूमौनिशुंभेभीमविक्रमे भ्रातर्यतीवसंक्रुद्धःप्रययौहंतुमंबिकां १७
ॐऐंक्रींनमः सरथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः भुजैरष्टाभिरतुलैर्व्याप्याशेषंबभौ
नभः १८ ॐऐंश्रींनमः तमायांतंसमालोक्यदेवीशंखमवादयत् ज्याशब्दंचापिधनुषश्च
कारातीवदुःसहं १९ ॐऐंश्रौंनमः पूरयामासककुभोनिजघंटास्वनेनच समस्तदैत्य
सैन्यानांतेजोवधविधायिना २० ॐऐंस्त्रूंनमः ततःसिंहोमहानादैस्त्याजितेभमहाम
दैः पूरयामासगगनंगांतथोपदिशोदश २१ ॐऐंश्लींनमः ततःकालीसमुत्पत्यगगनं
क्ष्मामताडयत् कराभ्यांतन्निनादेनप्राक्स्वनास्तेतिरोहिताः २२ ॐऐंश्रौंनमः अट्टाट्टहा
समशिवंशिवदूतीचकारह तैःशब्दैरसुरास्त्रेसुःशुंभःकोपंपरंययौ २३ ॐऐंस्त्रांनमः

दु॰
३८
38

दुरात्मंस्तिष्ठतिष्ठेतिव्याजहाराम्बिकायदा तदाजयेत्यभिहितंदेवैराका
शसंस्थितैः २४ ॐऐंह्लींनमः शूलेनागत्ययाशक्तिर्मुक्ताज्वालातिभीषणा
आयांतीवह्निकूटाभासानिरस्तामहोल्कया २५ ॐऐंब्लूंनमः सिंहनादेन
शुंभस्यव्याप्तंलोकत्रयांतरं निर्घातनिःस्वनोघोरोजितवानवनीपते २६ ॐऐं
क्लींनमः शुंभमुक्तांञ्छरान्देवीशुंभस्तत्प्रहितांञ्छरान् चिच्छेदस्वशरैरु
ग्रैःशतशोथसहस्रशः २७ ॐऐंस्त्रींनमः ततःसाचंडिकाक्रुद्धाशूलेनाभिजघान
तं सतदाभिहतोभूमौमूर्छितोनिपपातह २८ ॐऐंस्लूंनमः ततोनिशुंभःसंप्राप्य
चेतनामात्तकार्मुकः आजघानशरैर्देवीकालीकेसरिणंतथा २९ ॐऐंह्रेंनमः पुनश्च
कृत्वाबाहूनामयुतंदनुजेश्वरः चक्रायुधेनदितिजश्छादयामासचंडिकां ३॰ ॐऐंवींनमः

ततोभगवतीक्रुद्धादुर्गादुर्गार्तिनाशिनी चिच्छेदतानिचक्राणिस्वशरैःसायकां
श्चतान् ३१ ॐ ऐं क्लूं नमः ततोनिशुम्भोवेगेनगदामादायचंडिकां अभ्यधावतवैहन्तुं
दैत्यसेनासमावृतः ३२ ॐ ऐं ग्लूं नमः तस्यापततएवाशुगदांचिच्छेदचंडिका खड्गे
नशितधारेणसचशूलंसमाददे ३३ ॐ ऐं क्रूं नमः शूलहस्तंसमायान्तनिशुम्भममम
रार्दनं हृदिविव्याधशूलेनवेगाविद्धेनचंडिका ३४ ॐ ऐं फ्रां नमः भिन्नस्यतस्यशू
लेनहृदयान्निःसृतोपरः महाबलोमहावीर्यस्तिष्ठेतिपुरुषोवदन् ३५ ॐ ऐं ह्रौं न
मः तस्यनिष्क्रामतोदेवीप्रहस्यस्वनवत्ततः शिरश्चिच्छेदखड्गेनततोसावपतद्भु
वि ३६ ॐ ऐं क्रौं नमः ततःसिंहश्चखादोग्रंदंष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथा
कालीशिवदूतीतथापरान् ३७ ॐ ऐं ह्रीं नमः कौमारीशक्तिनिर्भिन्नाःकेचिन्नेशु

९
दु॰
३९

39

महासुराः ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृताः ३८ ॐ ऐं ह्रूं ह्रीं नमः माहेश्व
रीत्रिशूलेन भिन्नाः पेतुस्तथापरे वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ३९ ॐ
ऐं ह्रूं नमः खंडं खंडं च चक्रेण वैष्णव्या दानवाः कृताः वज्रेण चैन्द्री हस्ताग्रविमुक्ते
न तथापरे ४० ॐ ऐं श्रौं नमः केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् भक्षिता
श्चापरे कालीशिवदूतीमृगाधिपैः ४१ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्त
रे देवीमाहात्म्ये निशुम्भवधो नाम नवमोऽध्यायः ९ सांगायै सपरिवारायै भैरव्यै तारादेव्यै महा
हाहुतिं समर्पयामि नमः स्वाहा ९ ॥

अथ ध्यानं उद्यदहेमरुचिरां रविचंद्रवह्निनेत्रां धनुःशरयुतांकुशपाशा
न्‌ रम्यैर्भुजैश्च दधतीं शिवशक्तिरूपां कामेश्वरीं हृदि भजामि धृतेंदुलेखाम्‌ १
ॐ ऐं ह्रीं नमः ऋषिरुवाच १ ॐ ऐं ह्रूं नमः निशुंभं निहतं दृष्ट्वा भ्रातरं प्राणसंमितं
हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्रवीद्वचः २ ॐ ऐं ह्रीं नमः बलावलेपाद्दुष्टे त्वं मादु
र्गे गर्वमावह अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी ३ ॐ ऐं ह्रूं नमः देव्युवाच
ॐ ऐं ह्रूं नमः एकैवाहं जगत्यत्र द्वितीया का ममापरा पश्यैता दुष्ट मय्येव विशंत्यो
मद्विभूतयः ५ ॐ ऐं ह्रीं नमः ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयं तस्या देव्या
स्तनौ जग्मुरेकैवासीत्तदांबिका ६ ॐ ऐं ह्रीं नमः देव्युवाच ७ ॐ ऐं श्रीं नमः अहं विभूत्या
बहुभिरिह रूपैर्यदास्थिता तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ८ ॐ ऐं ह्रं नमः

४

९ । दु । ४०

५०

ऋषिरुवाच ९ ॐ ऐं ह्रूं नमः ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः पश्यतां सा
र्वदेवानामसुराणां च दारुणं १० ॐ ऐं ह्रौं नमः शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दा
रुणैः तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरं ११ ॐ ऐं श्रीं नमः दिव्यान्यस्त्राणि
शतशो मुमुचे यान्यथाम्बिका बभंज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः १२ ॐ ऐं ह्रूं
नमः मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी बभंज लीलयैवोग्रहुंकारोच्चा
रणादिभिः १३ ॐ ऐं ह्रूं नमः ततः शरशतैर्देवीमाच्छादयत सोऽसुरः सापि तत्कुपि
ता देवी धनुश्चिच्छेद चेषुभिः १४ ॐ ऐं फ्रें नमः छिन्ने धनुषि दैत्येंद्रस्तथा शक्ति
मथाददे चिच्छेद देवी चक्रेण तामप्यस्य करे स्थितां १५ ॐ ऐं ह्रां नमः ततः खड्गमु
पादाय शतचंद्रं च भानुमत् अभ्यधावत्तदा देवी दैत्यानामधिपेश्वरः १६ ॐ ऐं ज्रं

नमः तस्यापततएवाशु खड्गं चिच्छेद चंडिका यन्तुर्मुक्तैः शितैर्बाणैःस्तुर्म्मचा

र्कंकरामलं १७ ॐ ऐं सौं नमः हताश्वःसतदादैत्यश्छिन्नधन्वाविसारथिः जग्रा

हमुद्गरं घोरमंबिकानियनोद्यतः १८ ॐ ऐं स्लूं नमः चिच्छेदापततस्तस्यमुद्ग

रंनिशितैःशरैः तथापिसोभ्यधावत्तांमुष्टिमुद्यम्यवेगवान् १९ ॐ ऐं श्रें नमः समु

ष्टिंपातयामासहृदयेदैत्यपुंगवः देव्यास्तंचापिसादेवीतलेनोरस्यताडयन् २०

ॐ ऐं स्त्रां नमः तलप्रहाराभिहतोनिपपातमहीतले सदैत्यराजःसहसापुनरे

वतथोत्थितः २१ ॐ ऐं श्रीं नमः उत्पत्यचप्रगृह्योच्चैर्देवीगगनमास्थितः तत्रापिसा

निराधारायुयुधेतेनचंडिका २२ ॐ ऐं क्रां नमः नियुद्धं खेतदादैत्यश्चंडिका

चपरस्परं चक्रतुःप्रथमंसिद्धमुनिविस्मयकारकं २३ ॐ ऐं क्रीं नमः

९ दु. ४८

ततोनियुद्धं सुचिरंकृत्वातेनाम्बिकासह उत्पात्यभ्रामयामासचिक्षेपधरणी
तले २४ ॐऐंश्रींनमः सक्षिप्तोधरणींप्राप्यमुष्टिमुद्यम्यवेगितः अभ्यधाव
त्तदुष्टात्माचण्डिकानिधनेच्छया २५ ॐऐंक्रोंनमः तमायान्तंततोदेवीसर्वदै
त्यजनेश्वरं जगत्यांपातयामासभित्वाशूलेनवक्षसि २६ ॐऐंसःनमः स
गतासुःपपातोर्व्यांदेवीशूलाग्रविक्षतः चालयन्सकलांपृथ्वींसाब्धिद्वीपां
सपर्वतां २७ ॐऐंक्लींनमः ततःप्रसन्नमखिलंहतेतस्मिन्दुरात्मनि जग
त्स्वास्थ्यमतीवापनिर्मलंचाभवन्नभः २८ ॐऐंश्रींनमः उत्पातमेघाःसो
ल्कायेप्रागासंस्तेशमंययुः सरितोमार्गवाहिन्यस्तथासंस्तत्रपातिते २
ॐऐंईनमः ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः बभूवुर्निहतेतस्मि

५ ९

गंधर्वोललितंजगुः २० ॐऐंजंह्लीनमः अवादयंस्तथैवान्येननृतुश्चाप्स।
रोगणाः ववुःपुण्यास्तथावाताःसुप्रभोभूद्दिवाकरः २१ ॐऐंश्रौंनमः जज्व
लुश्चाग्नयःशांतप्रशांतदिग्जनितस्वनाः २२ इतिमार्कंडेयपुराणेसावर्णिकेम
न्वंतरेदेवीमाहात्म्येशुंभवधोनामदशमोध्यायः १० सांगायै सिंहासनायै
त्रिशूलपाशधारिण्यैमहाहुतिंसमर्पयामिनमःस्वाहा १०

॥
दु.
४२

42

अथध्यानं उद्यद्दिनद्युतिमिंदुकिरीटांतुंगकुचांनयनत्रययुक्तां स्मेरमुखींवर
दांकुशपाशाभीतिकरांप्रभजेभुवनेशीं ॥ ॐऐंह्रूंनमः ऋषिरुवाच १ ॐऐंश्रींन
मः देव्याहतेतत्रमहासुरेन्द्रेसेन्द्राःसुरावह्निपुरोगमास्तां कात्यायिनींतुष्टुवुरि
ष्टलाभाद्विकाशिवक्त्राब्जविकाशिताशाः २ ॐऐंह्रीं नमः देविप्रपन्नार्तिहरेप्रसी
दप्रसीदमातर्जगतोखिलस्य प्रसीदविश्वेश्वरिपाहिविश्वंत्वमीश्वरीदेविचरा
चरस्य ३ ॐऐंश्रींनमः आधारभूताजगतस्त्वमेकामहीस्वरूपेणयतःस्थितासि
अपांस्वरूपस्थितयात्वयैतदाप्यायतेकृत्स्नमलंघ्यवीर्ये ४ ॐऐंसौःनमः त्वंवैष्ण
वीशक्तिरनंतवीर्याविश्वस्यबीजंपरमासिमाया संमोहितंदेविसमस्तमेतत्त्वं।
वैप्रसन्नाभुविमुक्तिहेतुः ५ ॐऐंक्लींनमः विद्याःसमस्तास्तवदेविभेदाःस्त्रियः

समस्ताः सकलाजगत्सु त्वयैकया पूरितमंबयैतत्का ते स्तुतिः स्तव्यपरापरोक्तिः ६ ॐ ऐं श्रूं नमः सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी त्वं स्तुता स्तुतये का वा भवंतु परमोक्तयः ७ ॐ ऐं ह्लूं क्लीं नमः सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते स्वर्गापवर्गदे देवि नारायणि नमोस्तु ते ८ ॐ ऐं सं क्लीं नमः कलाकाष्ठादिरूपेण परिणामप्रदायिनि विश्वस्योपरतौ शक्ते नारायणि नमोस्तु ते ९ ॐ ऐं श्रीं नमः सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते १० ॐ ऐं स्लौं नमः सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि गुणाश्रये गुणमये नारायणि नमोस्तु ते ११ ॐ ऐं ह्स्व्रीं नमः शरणागतदीनार्तपरित्राणपरायणे सर्वस्यार्तिहरे देवि नारायणि नमोस्तु ते १२ ॐ ऐं ह्सौं नमः

११
दु.
४३

५३

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणी कौशांभःक्षरिके देवि नारायणि नमो
स्तु ते १३ ॐ ऐं ह्रीं नमः त्रिशूलचंद्राहिधरे महावृषभवाहिनि माहेश्वरीस्वरूपे
ण नारायणि नमोस्तु ते १४ ॐ ऐं ह्रीं नमः मयूरकुक्कुटवृते महाशक्तिधरे नघे
कौमारीरूपसंस्थाने नारायणि नमोस्तु ते १५ ॐ ऐं ह्रूं नमः शंखचक्रगदाशार्ङ्ग
गृहीतपरमायुधे प्रसीद वैष्णवीरूपे नारायणि नमोस्तु ते १६ ॐ ऐं [illegible] नमः
गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे वाराहरूपिणि शिवे नारायणि नमोस्तु ते
ॐ ऐं क्रूं नमः नृसिंहरूपेणोग्रेण हंतुं दैत्यान्कृतोद्यमे त्रैलोक्यत्राणसहिते नारा
यणि नमोस्तु ते १८ ॐ ऐं क्रूं नमः किरीटिनि महावज्रे सहस्रनयनोज्ज्वले वृत्रप्रा
णहरे चैंद्रि नारायणि नमोस्तु ते १९ ॐ ऐं ह्रीं नमः शिवदूतीस्वरूपेण हतदैत्य

१७

महाबले घोररूपे महारावे नारायणि नमोस्तु ते २० ॐ ऐं ह्रीं नमः दंष्ट्राक
रालवदने शिरोमालाविभूषणे चामुण्डे मुण्डमथने नारायणि नमोस्तु ते २१ ॐ
ऐं क्लीं नमः लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे महारात्रि महाविद्ये ना
रायणि नमोस्तु ते २२ ॐ ऐं श्रूं नमः मेधे सरस्वति वरे भूति बाभ्रवि तामसि निय
ते त्वं प्रसीदेशे नारायणि नमोस्तु ते २३ ॐ ऐं ईं नमः सर्वस्वरूपे सर्वेशे सर्वश
क्तिसमन्विते भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते २४ ॐ ऐं जं नमः एतत्ते वद
नं सौम्यं लोचनत्रयभूषितं पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तु ते २५ ॐ ऐं त्रं नमः
ज्वालाकरालमत्युग्रमशेषासुरसूदनं त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते २
ॐ ऐं ङं नमः हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् सा घंटा पातु नो देवि पापे

॥
उ.
४४

५५

भ्योनःस्तनानिव २७ ॐ ऐं ह्रौं नमः असुरासृग्वसापंकचर्चितस्ते करोज्वलः शु
भाय खड्गोभवतु चंडिके त्वां नतावयं २८ ॐ ऐं ह्रीं नमः रोगानशेषानपहंसितु
ष्टा रुष्टा तु कामान्सकलानभीष्टान् त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्या
श्रयतां प्रयांति २९ ॐ ऐं ह्स्रीं नमः एतत्कृतं यत्कदनं त्वयाद्य यर्म्मद्विषो देवि
महासुराणां रूपैरनेकैर्बहुधात्ममूर्त्तिं कृत्वांविके तत्प्रकरोति कान्या ३० ॐ ऐं क्रीं
नमः विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ममत्वगर्त्तेतिमहा
यकारे विभ्रामयत्येतदतीव विश्वं ३१ ॐ ऐं श्रूं नमः रक्षांसि यत्रोग्रविषाश्च नागाय
त्रारयो दस्युबलानि यत्र दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वं ३२
ॐ ऐं त्रूं नमः विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वं विश्वेश

वंध्याभवतीभवंतिविख्याप्रयायेत्वयिभक्तिनम्राः ३३ ॐ ऐं स्हूं नमः देविप्रसीद परिपालयनोरिभीतेर्नित्यंयथाम्हरवधादधुनैवसद्यः पापानिसर्वजगतांप्रशमंनयाशुउत्पातपाकजनितांश्चमहोपसर्गान् ३४ ॐ ऐं स्ह्रीं नमः प्रणतानांप्रसीदत्वंदेविविश्वार्तिहारिणि त्रैलोक्यवासनामीडे लोकानांवरदाभव ३५ ॐ ऐं लंनमः देव्युवाच ३६

ॐ ऐं ल्हौं नमः वरदाहंसुरगणावरंयन्मनसेच्छथ तंवृणध्वंप्रयच्छामिजगतामुपकारकं ३७ ॐ ऐं ल्हूं नमः देवाऊचुः ३८ ॐ ऐं ह्रीं नमः सर्वाबाधाप्रशमनंत्रैलोक्यस्याखिलेश्वरि एवमेवत्वयाकार्यमस्मद्वैरिविनाशनं ३९ ॐ ऐं ह्लां नमः देव्युवाच ४० ॐ ऐं विंनमः वैवस्वतेंतरेप्राप्तेअष्टाविंशतिमेयुगे शुंभोनिशुंभश्चैवान्यावुत्पत्स्येतेमहासुरौ ४१ ॐ ऐं ह्लीं नमः नंदगोपगृहेजातायशोदागर्भसंभवा ततस्तौनाशयिष्यामिविंध्याचलनि।

११
दु.
४५
45

वासिनी ४२ ॐऐंस्ह्लूंनमः पुनरप्यतिरौद्रेणरूपेणपृथिवीतले अवतीर्यहनिष्यामि
वैप्रचित्तांस्तुदानवान् ४३ ॐऐंत्स्रांनमः भक्षयंत्याश्चतानुग्रान्वैप्रचित्तान्महासुरान् रक्तादं
ताभविष्यंतिदाडिमीकुसुमोपमाः ४४ ॐऐंमंनमः ततोमांदेवताःस्वर्गे मर्त्यलोकेचमानवाः
स्तुवंतोव्याहरिष्यंतिसततंरक्तदंतिकां ४५ ॐऐंश्रींनमः भूयश्चशतवार्षिक्यामनावृष्ट्यामनं
भसि मुनिभिःसंस्तुताभूमौसंभविष्याम्ययोनिजा ४६ ॐऐंस्हूंनमः ततःशतेननेत्राणांनि
रीक्षिष्यामियन्मुनीन् कीर्तयिष्यंतिमनुजाःशताक्षीमितिमांततः ४७ ॐऐंस्नांनमः ततो
हमखिलंलोकमात्मदेहसमुद्भवैः भरिष्यामिसुराःशाकैरावृष्टेःप्राणधारकैः ४८ ॐऐंह्रूं
नमः शाकंभरीतिविख्यातिंतदायास्याम्यहंभुवि तत्रैवचवधिष्यामिदुर्गमाख्यंमहासुरं ४ ९
ॐऐंस्ह्रींनमः दुर्गादेवीतिविख्यातंतन्मेनामभविष्यति पुनश्चाहंयदाभीमंरूपंकृत्वा

हिमाचले ५० ॐ ऐं ह्रीं नमः रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् तदा मां मुन
यः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ५१ ॐ ऐं ह्रौं नमः भीमादेवीति विख्यातं तन्मे नाम भविष्यति
यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ५२ ॐ ऐं श्रौं नमः तदाहं भ्रामरं रूपं कृत्वासंख्ये
यषट्पदं त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं ५३ ॐ ऐं ह्रीं नमः भ्रामरीति च मां ।
लोकास्तदा स्तोष्यन्ति सर्वतः इत्थं यदा यदा बाधा दानवोत्था भविष्यति ५४ ॐ ऐं क्लीं नमः
तदा तदावतीर्याहं करिष्याम्यरिसंक्षयं ५५ इति मार्कंडेयपुराणे सावर्णिके मन्वन्तरे दे
वीमाहात्म्ये नारायणस्तुतिर्नाम एकादशोध्यायः ११ सांगायै सर्वनारायण्यै महाकु
तिं समर्पयामि नमः स्वाहा ११

१२
उ.
४६
46

अथध्यानं विद्युद्दामसमप्रभांमृगपतिस्कंदस्थितांभीषणां कन्याभिःकरवालखेट
विलसद्धस्ताभिरासेवितां हस्तैश्चक्रगदासिखेटविशखांश्चापंगुणंतर्जनं विभ्राणां।
मनलात्मिकांशशिधरांडुर्गांत्रिनेत्रांस्मरेत् १२ ॐऐंॐनमः देव्युवाच १ ॐऐंश्रीन
मः एभिःस्तवैश्चमांनित्यंस्तोष्यतेयःसमाहितः तस्याहंसकलांबाधांशमयिष्यामि
संशयं २ ॐऐंईनमः मधुकैटभनाशंचमहिषासुरघातनं कीर्तयिष्यंतियेतद्वद्वधं
शुंभनिशुंभयोः ३ ॐऐंक्लींनमः अष्टम्यांचचतुर्दश्यांनवम्यांचैकचेतसः श्रोष्यंतिचैव
येभक्त्याममममाहात्म्यमुत्तमं ४ ॐऐंत्रींनमः नतेषांदुष्कृतंकिंचिद्दुष्कृतोत्थानचापदः भ
विष्यतिनदारिद्र्यंनचैवेष्टवियोजनं ५ ॐऐंस्लूंनमः शत्रुतोनभयंतस्यदस्युतोवानराजतः
नशस्त्रानलतोयौघात्कदाचित्संभविष्यति ६ ॐऐंग्रांनमः तस्मान्ममैतन्माहात्म्यंपठित

र्वंसमाहितैः श्रोतव्यंचसदाभक्त्यापरंस्वस्त्ययनंहितत् ७ ॐऐंक्रूंनमः उपसर्गा
नशेषांस्तुमहामारीसमुद्भवां तथात्रिविधमुत्पातमाहात्म्यशमयेन्मम ८ ॐऐंवींनमः
यत्रैतत्पठ्यतेसम्यङ्नित्यमायतनेमम सदानतद्विमोक्ष्यामिसान्निध्यंतत्रमेस्थितं ९
ॐऐंक्रींनमः वलिप्रदानेपूजायामग्निकार्येमहोत्सवे सर्वंममैतच्चरितमुच्चार्यंश्राव्य
मेवच १० ॐऐंह्रंनमः जानताऽजानतावापिवलिपूजांतथाकृतां प्रतीच्छिष्याम्यहंप्रीत्या
वह्निहोमंतथाकृतं ११ ॐऐंसः नमः शरत्कालेमहापूजाक्रियतेयाचवार्षिकी तस्यां
ममैतन्माहात्म्यंश्रुत्वाभक्तिसमन्वितः १२ ॐऐंचेंनमः सर्वावाधाविनिर्मुक्तोधनधान्य
समन्वितः मनुष्योमत्प्रसादेनभविष्यतिनसंशयः १३ ॐऐंस्त्रंनमः श्रुत्वाममैतन्माहा
त्म्यंतथाचोत्पत्तयःशुभाः पराक्रमंचयुद्धेषुजायतेनिर्भयःपुमान् १४ ॐऐंप्रींनमः

रिपवः संक्षयं यांति कल्याणं चोपपद्यते नंदते च कुलं पुंसां माहात्म्यं मम शृण्वतां १५
ॐ ऐं ह्रूं नमः शांतिकर्माणि सर्वत्रतथा दुःस्वप्नदर्शने ग्रहपीडासु चोग्रासु माहात्म्यं
शृणुयान्मम १६ ॐ ऐं श्रां नमः उपसर्गाः शमं यांति ग्रहपीडाश्च दारुणाः दुःस्वप्नं
च नृभिर्दृष्टं सुस्वप्नमुपजायते १७ ॐ ऐं ऊं नमः वालग्रहाभिभूतानां वालानां शांति
कारकं संघातभेदे च नृणां मैत्रीकरणमुत्तमं १८ ॐ ऐं ह्रीं नमः दुर्वृत्तानामशेषाणां
वलहानिकरं परं रक्षोभूतपिशाचानां पठनादेव नाशनं १९ ॐ ऐं ह्रीं नमः सर्वम
ममैतन्माहात्म्यं मम सान्निध्यकारकं पशुपुष्पार्घ्यधूपैश्च गंधदीपैस्तथोत्तमैः २०
ॐ ऐं ऊं नमः विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशं अन्यैश्च विविधैर्भोगैः प्रदानै
र्वत्सरेण या २१ ॐ ऐं श्रीं नमः प्रीतिर्मे क्रियते सास्मिन् सकृत्सुचरिते श्रुते श्रुतं हर।

तिपापानितथारोग्यंप्रयच्छति २२ ॐऐंह्रींनमः रक्षांकरोतिभूतेभ्योजन्मनांकी
र्तनंमम युद्धेषुचरितंयन्मेदुष्टदैत्यनिवर्हणं २३ ॐऐंक्लींनमः तस्मिन्श्रुतेवै
रिकृतंभयंपुंसांनजायते युष्माभिःस्तुतयोयाश्चयाश्चब्रह्मर्षिभिःकृताः २४ ॐऐं
ह्रूंनमः ब्रह्मणाचकृतायास्तुप्रयच्छंतिशुभामतिं अरण्येप्रांतरेवापिदावाग्निपरि
वारितः २५ ॐऐंह्रींनमः दस्युभिर्वावृतःशून्येगृहीतोवापिशत्रुभिः सिंहव्याघ्रा
नुयातोवावनेवावनहस्तिभिः २६ ॐऐंह्रींनमः राज्ञाक्रुद्धेनचाज्ञप्तोवध्योबंध
गतोपिवा आघूर्णितोवावातेनस्थितःपोतेमहार्णवे २७ ॐऐंश्रींनमः पतत्सुचापि
शस्त्रेषुसंग्रामेभृशदारुणे सर्वाबाधासुघोरासुवेदनाभ्यर्दितोपिवा २८ ॐऐंह्रूंनमः
स्मरन्ममैतच्चरितंनरोमुच्येतसंकटात् ममप्रभावात्सिंहाद्यादस्यवोवैरिणस्तथा २९

१२
दु०
४८
58

ॐऐंघ्रौंनमः दूरादेवपलायंतेस्मरतश्चरितंमम ३० ॐऐंयेंनमः ऋषिरुवाच ॐ
ऐंघ्रेंनमः ३१ एकासाभगवतीचंडिकाचंडविक्रमा ३२ ॐऐंटूंनमः एवमुक्तासर्वदेवा
नांतत्रैवांतरधीयत तेपिदेवानिरातंकाःस्वाधिकारान्यथापुरा ३३ ॐऐंल्लूंनमः
यज्ञभागभुजःसर्वेचक्रुर्विनिहतारयः दैत्याश्चदेव्यानिहतेशुंभेदेवरिपौयुधि ३४
ॐऐंऊंनमः जगद्विध्वंसकेतस्मिन्महोग्रेतुलविक्रमे निशुंभेचमहावीर्येशेषाःपा
तालमाययुः ३५ ॐऐंस्लूंनमः एवंभगवतीदेवीसानित्यापिपुनःपुनः संभूयकुरुते
भूपजगतःपरिपालनं ३६ ॐऐंचेंनमः तयेतन्मोह्यतेविश्वंसैवविश्वंप्रसूयते
सायाचिताचविज्ञानंतुष्टाऋद्धिंप्रयच्छति ३७ ॐऐंक्रूंनमः व्याप्तंतयेतत्सकलंब्र
ह्मांडमनुजेश्वरं महाकाल्यामहाकालेमहामारीस्वरूपया ३८ ॐऐंज्रूंनमः

सैवकालीमहामारीसैवसृष्टिर्भवत्यजा स्थितिंकरोतिभूतानांसैवकालेसनातनी ३९
ॐऐंह्रींनमः भावकालेनृणांसैवलक्ष्मीर्वृद्धिप्रदागृहे सैवाभावेतथालक्ष्मीर्वि।
नाशायोपजायते ४० ॐऐंश्रींनमः स्तुतासंपूजितापुष्पैर्धूपगंधादिभिस्तथा ददाति
वित्तंपुत्रांश्चमतिंधर्मेतथाशुभात् ४१ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवी।
माहात्म्येफलानुकीर्तनेनामद्वादशोध्यायः १२ सांगायै बालाग्निपरस्कंदर्यैमहाहुतिं
समर्पयामिनमःस्वाहा १२ ॥

१३
उ॰
४८

५१

अथ ध्यानं पद्मासनस्थां करपंकजाभ्यां रक्तोत्पले संदधतीं त्रिनेत्रां सविभ्रमां मामरु
णां निरक्तां पद्मावतीं पद्मसुखीं नमामि ॐ ऐं ह्रीं नमः ऋषिरुवाच १ ॐ ऐं ॐ नमः एतत्ते
कथितं भूप देवीमाहात्म्यमुत्तमं एवं प्रभावा सा देवी ययेदं धार्यते जगत् २ ॐ ऐं क्लां नमः
विद्या तथैव क्रियते भगवद्विष्णुमायया तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ३ ॐ
ऐं श्रीं नमः मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे तामुपैहि महाराज शरणं परमेश्व
री ४ ॐ ऐं ष्रां नमः आराधिता सैव नृणां भोगस्वर्गापवर्गदा ५ ॐ ऐं ॐ नमः मार्कंडेय उ
वाच ६ ॐ ऐं ह्लीं नमः इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ७ ॐ ऐं स्रौं नमः प्रणिपत्य
महाभागं तमृषिं संशितव्रतं निर्विण्णोतिममत्वेन राज्यापहरणेन च ८ ॐ ऐं क्लीं नमः
जगाम सद्यस्तपसे स च वैश्यो महामुने संदर्शनार्थमंबाया नदीपुलिनसंस्थितः ९

ॐ ऐं क्रीं नमः सचवैश्यस्तपस्तेपे देवीसूक्तं परं जपन् तौ तस्मिन्पुलिने देव्याः कृत्वा
मूर्तिं महीमयीं १० ॐ ऐं ह्रूं नमः अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः यताहा
रौ निराहारौ तन्मनस्कौ समाहितौ ११ ॐ ऐं क्रीं नमः ददतुस्तौ वलिं चैव निजगात्रासृ
गुक्षितं एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः १२ ॐ ऐं क्रीं नमः परितुष्टा जगद्धात्री
प्रत्यक्षं प्राह चंडिका १३ ॐ ऐं ह्रीं नमः देव्युवाच १४ ॐ ऐं श्रां नमः यत्प्रार्थ्यते त्वया।
भूप त्वया च कुलनंदन मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् १५ ॐ ऐं ह्रीं नमः
मार्कंडेय उवाच १६ ॐ ऐं फ्रूं नमः ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि अत्रैव च निजं
राज्यं हतशत्रुबलं बलात् १७ ॐ ऐं क्रीं नमः सोपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः म
मेत्यहमिति प्राज्ञः संगविच्युतिकारकं १८ ॐ ऐं ह्रूं नमः देव्युवाच १९ ॐ ऐं हूं नमः स्वल्पै

१३
उ०
५०

रहत्वाभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् २० ॐ ऐं क्लूं नमः हत्वा रिपूनस्खलितं तव तत्र भविष्य
ति २१ ॐ ऐं श्रीं नमः मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः २२ ॐ ऐं स्त्रूं नमः सावर्णि
को नाम मनुर्भवान्भुवि भविष्यति २३ ॐ ऐं ह्रौं नमः वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभि
वाञ्छितः २४ ॐ ऐं श्रां नमः तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति २५ ॐ ऐं ॐ नमः
मार्कंडेय उवाच २६ ॐ ऐं क्रुं नमः इति दत्वा तयोर्देवी यथाभिलषितं वरं बभूवान्तर्हिता
सद्यो भक्त्या ताभ्यामभिष्टुता २७ ॐ ऐं स्हौं नमः एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः २८ ॐ ऐं श्रों नमः सावर्णिर्भविता मनुः २९
७०० इति मार्कंडेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये सुरथवैश्यवरप्रदानो नाम त्रयोदशो
ध्यायः १३ अथोत्तरन्यासः खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा शंखिनी चापिनी बाण

मुण्डीपरिघायुधा हृदयायनमः शूलेनपाहिनोदेविपाहिखड्गेनचांबिके घंटा
स्वनेननःपाहिचापज्यानिःस्वनेनच शिरसेस्वाहा प्राच्यांरक्षप्रतीच्यांचचंडिकेरक्षद
क्षिणे भ्रामणेनात्मशूलस्यउत्तरस्यांतथेश्वरि शिखायैवषट् सौम्यानियानिरूपाणि
त्रैलोक्येविचरंतिते यानिचात्यर्थघोराणितैरस्मांस्तथाभुवं कवचायहुं खड्गशूल
गदादीनियानिचास्त्राणितेंबिके करपल्लवसंगीनितैरस्मान्रक्षसर्वतः नेत्रत्रयायवौ
षट् सर्वस्वरूपेसर्वेशेसर्वशक्तिसमन्विते भयेभ्यस्त्राहिनोदेविदुर्गेदेविनमोस्तुते
अस्त्रायफट् विद्युद्दामसमप्रभांमृगपतिस्कंधस्थितांभीषणांकन्याभिःकरवालखेटवि
लसद्धस्ताभिरासेवितां हस्तैश्चक्रधरालिखेटविशिखांश्चापंगुणंतर्जनीं बिभ्राणाम
नलात्मिकांशशिधरांदुर्गांत्रिनेत्रांभजे १ इतिध्यानम् ॥

ॐनमोदेव्यै अथदेवीसूक्तं नमोदेव्यैमहादेव्यैशिवायैसततंनमः नमःप्रकृत्यै
भद्रायैनियताःप्रणताःस्मतां १ रौद्रायैनमोनित्यायैगौर्य्यैधात्र्यैनमोनमः ज्योत्स्नायैचें
दुरूपिण्यैसुखायैसततंनमः २ कल्याण्यैप्रणतांवृद्ध्यैसिद्ध्यैकूर्म्मैनमोनमः नैर्ऋत्यैभू
भृतांलक्ष्म्यैशर्वाण्यैतेनमोनमः ३ दुर्गायैदुर्गपारायैसारायैसर्वकारिण्यै ख्यात्यैतथै
वकृष्णायैधूम्रायैसततंनमः ४ अतिसौम्यातिरौद्रायैनतास्तस्यैनमोनमः नमोजगत्प्र
तिष्ठायैदेव्यैकृत्यैनमोनमः ५ यादेवीसर्वभूतेषुविष्णुमायेतिशब्दिता नमस्तस्यैनम
स्तस्यैनमस्तस्यैनमोनमः ६ यादेवीसर्वभूतेषुचेतनेत्यभिधीयते नमस्तस्यैनमस्तस्यै
नमस्तस्यैनमोनमः ७ यादेवीसर्वभूतेषुबुद्धिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्त
स्यैनमोनमः ८ यादेवीसर्वभूतेषुनिद्रारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यै

नमोनमः ९ यादेवीसर्वभूतेषुक्षुधारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यै
नमोनमः १० यादेवीसर्वभूतेषुछायारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैन
मोनमः ११ यादेवीसर्वभूतेषुशक्तिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमो
नमः १२ यादेवीसर्वभूतेषुतृष्णारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १३
यादेवीसर्वभूतेषुक्षांतिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १४
यादेवीसर्वभूतेषुजातिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १५
यादेवीसर्वभूतेषुलज्जारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १६
यादेवीसर्वभूतेषुशांतिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १७
यादेवीसर्वभूतेषुश्रद्धारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १८

दे॰
स्तु॰
५२

52

यादेवीसर्वभूतेषुकांतिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १९
यादेवीसर्वभूतेषुलक्ष्मीरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २०
यादेवीसर्वभूतेषुवृत्तिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २१
यादेवीसर्वभूतेषुस्मृतिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २२
यादेवीसर्वभूतेषुदयारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २३
यादेवीसर्वभूतेषुतुष्टिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २४
यादेवीसर्वभूतेषुमातृरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २५
यादेवीसर्वभूतेषुभ्रांतिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २६
इंद्रियानामधिष्ठात्रीभूतानांचाखिलेषुया भूतेषुसततंतस्यैव्याप्तिदेव्यैनमोनमः २७

चितिरूपेणयाकृत्स्नमेतद्व्याप्यस्थिताजगत् नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २८
स्तुतासुरैःपूर्वमभीष्टसंश्रयात्तथासुरेन्द्रेणदिनेषुसेविता करोतुसानःशुभहे
तुरीश्वरीशुभानिभद्राण्यभिहंतुचापदः २९ यासांप्रतंचोद्धतदैत्यतापितैरस्मा
भिरीशाचसुरैर्नमस्यते याचस्मृतातत्क्षणमेवहंतिनःसर्वापदाभक्तिविनम्रमूर्ति
भिः ३० गुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपं सिद्धिर्भवतुमेदेवित्वत्प्रसा
दान्महेश्वरि ३१ इतिदेव्यावामहस्तेनजपंनिवेदयेत् ॥

प्रा॰
र॰
५३

ॐ नमो देव्यै अस्य श्रीसप्तशतीरहस्यत्रयस्य नारायणऋषिः अनुष्टुप्छंदः महाका
ली महालक्ष्मी महासरस्वती देवता यथोक्तफलवाप्त्यर्थं जपे विनियोगः राजोवा
च भगवन्नवतारा मे चंडिकायास्त्वयोदिताः एतेषां प्रकृतिं ब्रह्मन्प्रधानं वक्तुमर्हसि।
१ आराध्यं यन्मया देव्याः स्वरूपं येन तद्द्विज विधिना ब्रूहि सकलं यथावत्प्रणतस्य
मे २ ऋषिरुवाच इदं रहस्यं परममनाख्येयं प्रचक्षते भक्तोसीति न मे किंचित्तवावा
च्यं नराधिप ३ सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृ
त्स्नं व्यवस्थिता ४ मातुलिंगं गदां खेटं पानपात्रं च बिभ्रती नागं लिंगं च योनिं च बिभ्रती नृ
प मूर्द्धनि ५ तप्तकांचनवर्णाभा तप्तकांचनभूषणा शून्यं तदखिलं स्वेन पूरयामास ते
जसा ६ शून्यं तदखिलं लोकं विलोक्य परमेश्वरी बभार रूपमपरं तमसा केवलेन हि

53

७

साभिन्नांजनसंकाशादंष्ट्रांचितवरानना विशाललोचनानारीवभूवतनुमध्यमा ८
खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा कवंधशिरसांहारंविभ्राणाहिशिरःस्रजं ९ सा
प्रोवाचमहालक्ष्मीतामसीप्रमदोत्तमा नामकर्मचमेमातर्देहितुभ्यंनमोनमः १०
तांप्रोवाचमहालक्ष्मीस्तामसींप्रमदोत्तमां ददामितवनामानियानिकर्माणितानिच ११
महामायामहाकालीमहामारीक्षुधात्तृषा निद्रातृष्णाचैकवीराकालरात्रिर्दुरत्यया १२
इमानितवनामानिप्रतिपाद्यानिकर्मभिः एभिःकर्माणितेज्ञात्वायोधीतेसोश्नुतेसुखं १३
तामित्युक्त्वामहालक्ष्मीःस्वरूपमपरंनृप सत्वाख्येनातिशुद्धेनगुणेनेंदुप्रभंदधौ १४
अक्षमालांकुशधरावीणापुस्तकधारिणी साबभूववरानारीनामान्यस्यैचसाददौ १५
महाविद्यामहावाणीभारतीवाक्सरस्वती आर्याब्राह्मीकामधेनुर्वेदगर्भाचधीश्वरी १६

प्रा॰
र॰
५४

अथोवाचमहालक्ष्मीर्महाकालींसरस्वतीं युवांजनयतांदेव्यौमिथुनेस्वानुरूपतः १७

इत्युक्त्वातेमहालक्ष्मीःससर्जमिथुनंस्वयं हिरण्यगर्भौरुचिरौस्त्रीपुंसौकमलासनौ १८

ब्रह्मन्विधेविरिंचेतिधातरित्याहतंनरं श्रीःपद्मेकमलेलक्ष्मीत्याहमाताश्चियंचतां १९

महाकालीभारतीचमिथुनेसृजतःसह एतयोरपिरूपाणिनामानिचवदामिते २०

54

नीलकंठंरक्तबाहुंश्वेतांगंचंद्रशेखरं जनयामासपुरुषंमहाकालीसितांस्त्रियं २१

सरुद्रःशंकरःस्थाणुःकपर्दीचत्रिलोचनः त्रयीविद्याकामधेनुःसास्त्रीभाषाक्षरास्वरा २२

सरस्वतीस्त्रियंगौरींकृष्णंचपुरुषंनृप जनयामासनामानितयोरपिवदामिते २३

विष्णुःकृष्णोहृषीकेशोवासुदेवोजनार्दनः उमागौरीसतीचंडीसुंदरीसुभगाशुभा २४

एवंयुवतयःसद्यःपुरुषत्वंप्रपेदिरे चक्षुष्मंतोनुपश्यंतिनेतरेतद्विदोजनाः २५

ब्रह्मणेप्रददौपत्नीमहालक्ष्मीर्नृपत्रयी रुद्रायगौरीवरदांवासुदेवायचश्रियं २६
स्वरयासहहंसंभूयविरंचोंऽडमजीजनत् बिभेदभगवान्रुद्रस्तंगौर्यासहवीर्यवान् २७
अंडमध्येप्रधानानिकार्यजातमभून्नृप महाभूतात्मकंसर्वंजगत्स्थावरजंगमं २८ पुपो
षपालयामासतल्लक्ष्म्यासहकेशवः संजहारजगत्सर्वंसहगौर्यामहेश्वरः २९ म
हालक्ष्मीर्महाराजसर्वसत्वमयीश्वरी निराकाराचसाकारासैवनानाभिधानभृत् ३०
नमांतरैर्निरूप्यैषानाम्नानान्येनकेनचित् ३१ इतिप्राधानिकंरहस्यंसमाप्तम् ॥

वै॰
र॰
५५

55

ऋषिरुवाच त्रिगुणातामसीदेवीसात्विकीयात्रयोदिता साशर्वाचंडिकादुर्गाभद्राभग
वतीर्यते १ योगनिद्राहरेरुक्तामहाकालीतमोगुणा मधुकैटभनाशार्थंयांतुष्टावांबुजास
नः २ दशवक्त्रादशभुजादशपादांजनप्रभा विशालयाराजमानात्रिंशल्लोचनमालया ३
स्फुरद्दशनदंष्ट्रासाभीमरूपापिभूमिप रूपसौभाग्यकांतीनांसाप्रतिष्ठामहाश्रियां ४
खड्गबाणगदाशूलशंखचक्रभुशुंडिभृत् परिघंकार्मुकंशीर्षंनिश्च्योतद्रुधिरंदधौ ५
एषासावैष्णवीमायामहाकालीदुरत्यया आराधितावशीकुर्यात्पूजाकर्तुश्चराचरं ६
सर्वदेवशरीरेभ्योयाविर्भूतामितप्रभा त्रिगुणासामहालक्ष्मीःसाक्षान्महिषमर्दिनी ७
श्वेताननानीलभुजासुश्वेतस्तनमंडला रक्तमध्यारक्तपादानीलजंघोरुरुन्मदा ८ सु
चित्रजघनाचित्रमाल्यांवरविभूषणा चित्रानुलेपनाकांतिरूपसौभाग्यशालिनी ९

अष्टादशभुजापूज्यासासहस्रभुजासती आयुधान्यत्रवक्ष्यंतेदक्षिणाधः करक्रमात् १०
अक्षमालाचकमलंवाणोसिः कुलिशंगदा चक्रंत्रिशूलंपरशुः शंखोघंटाचपाशकः ११
शक्तिर्दंडश्चर्मचापंपानपात्रंकमंडलुः अलंकृतभुजामेभिरायुधैःकमलासना १२ स
र्वदेवमयीमीशांमहालक्ष्मीमिमांन्टप पूजयेत्सर्वलोकानांसदेवानांप्रभुर्भवेत् १३
गौरीदेहात्समुद्भूतायासत्वैकगुणाश्रया साक्षात्सरस्वतीप्रोक्ताशुंभासुरनिवर्हिणी १४
ददौचाष्टभुजावाणमुसलंशूलचक्रभृत् शंखंघंटांलांगलंचकार्मुकंवसुधाधिप १५
एषांसंपूजिताभक्त्यासर्वज्ञत्वंप्रयच्छति निशुंभमथिनीदेवीशुंभासुरनिवर्हिणी १६
इत्युक्तानिस्वरूपाणिमूर्तीनांतवपार्थिव उपासनंजगन्मातुःपृथगासांनिशामय १७ म
हालक्ष्मीर्यदापूज्यामहाकालीसरस्वती दक्षिणोत्तरयोःपूज्येपृष्टतोमिथुनत्रयम् १८

वै॰ र॰ ५८

विरंचिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयं १९ अ
ष्टादशभुजा मध्ये वामे चास्या दशानना दक्षिणेष्टभुजा लक्ष्मीर्महतीति समर्चयेत् २०
पूर्वादिदलतः पूज्या असितांगादिभैरवाः अष्टादशभुजा चैषा यदा पूज्या नराधिप २१ द
शानना चाष्टभुजा दक्षिणोत्तरयोस्तदा दशानना यदा पूज्या दक्षिणोत्तरयोस्तदा २२ का
लमृत्यूश्च संपूज्यौ सर्वारिष्टप्रशांतये यदा चाष्टभुजा पूज्या शुंभासुरनिबर्हिणी २३ न
वास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत् २४
अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः अष्टादशभुजा चैषा पूज्या महिषमर्दिनी २५
महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी २६
महिषांतकरी येन पूजिता स जगत्प्रभुः पूजयेज्जगतां धात्रीं चंडिकां भक्तवत्सलां २७

50

अर्घ्यादिभिरलंकारैर्गंधपुष्पैस्तथोत्तमैः धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः २८
तर्पयित्वैकेन बलिना मांसेन स्वरयान्नृप बलिर्मांसादिपूजेयं विप्रवर्ज्या मयेरिता २९
तेषां किल स्वरामांसैर्नैकाः पूजान्यपकाचित् प्रणामाचमनीयश्च चंदनेन सुगंधिना ३०
सकर्पूरैश्च तांबूलैर्भक्तिभावसमन्वितैः वामभागे ग्रतो देव्याश्छिन्नशीर्षं महासुरं ३१
पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया दक्षिणेग्रतः सिंहं समग्रं यमीश्वरं ३२ वा
हनं पूजयेद्देव्या धृतं येन चराचरं ततः कृतांजलिर्भूत्वा स्तुवीत चरितैरिमैः ३३ एकेन
वामध्यमेन नैकेनेतरयोरिह चरितार्थं तु न जपेज्जपं छिद्रमवाप्नुयात् ३४ स्तोत्रं मंत्रैः स्तु
वीतेमां यदि वा जगदंबिकां प्रदक्षिणानमस्कारान्कृत्वा मूर्ध्नि कृतांजलिः ३५ क्षमापये
ज्जगद्धात्रीं मुहुर्मुहुरतंद्रितः प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा ३६ जुहुयात्स्तोत्रमं

वै. र. ५७ 57

दैवीं चंडिकायै पुष्पं महद्धविः भूयो नामपदैर्देवीं पूजयेत्सु समाहितः ३७ प्रयतः प्रांज
लिः प्रह्वः प्राणानारोप्य चात्मनि सुचिरं भावयेद्देवीं चंडिकां तन्मयो भवेत् ३८ एवं यः
पूजयेद्भक्त्या प्रत्यहं परमेश्वरीं भुक्त्वा भोगान्यथाकामं देवीसायुज्यमाप्नुयात् ३९ यो
न पूजयते नित्यं चंडिकां भक्तवत्सलां भस्मीकृत्यास्य पुण्यानि निर्दहेत्परमेश्वरी ४०
तस्मात्पूजय भूपाल सर्वलोकमहेश्वरीं यथोक्तेन विधानेन चंडिकां सुखमाप्स्यसि ४१
इति वैकृतिकं रहस्यं समाप्तम् ॥

ऋषिरुवाच नंदाभगवतीनामयाभविष्यतिनंदजा स्तुतासंपूजिताभक्त्यावशीकुर्यौ
जगत्त्रयं १ कनकोत्तमकांतिःसासुकांतिकनकांवरा देवीकनकवर्णाभाकनकोत्तमभू
षणा २ कमलांकुशपाशाब्जैरलंकृतचतुर्भुजा इंदिराकमलालक्ष्मीः साश्रीरुक्मांवुजा
सना ३ यारक्तदंतिकानामदेवीप्रोक्तामयानघ तस्याःस्वरूपंवक्ष्यामिशृणुसर्वभयापहं
यस्तुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः रक्तांवरारक्तवर्णारक्तसर्वांगभूषणा ५ र
क्तायुधारक्तनेत्रारक्तकेशातिभीषणा रक्ततीक्ष्णनखारक्तरसनारक्तदंतिका ६
पतिंनारीवानुरक्तादेवीभक्तंभजेज्जनं वसुधेवविशालासासुमेरुयुगलस्तनी ७
दीर्घौलंवावतिस्थूलौतावतीवमनोहरौ कर्कशावतिकांतौतौसर्वानंदपयोनिधी ८
भक्तान्संपाययेद्देवीसर्वपापघ्नौस्तनौ खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा ९

४

मू.
र.
५८

58

आख्याता रक्तचामुंडा देवी योगेश्वरीति च अनया व्याप्तमखिलं जगत्स्थावरजंगमं ९
इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरं भुक्त्वा भोगान्यथाकामं देवीसायुज्यमाप्नुयात्
अधीते य इमं नित्यं रक्तदंत्या वपुस्तवं तं सा परिचरेद्देवी पतिं प्रियमिवांगना ११ शा
कंभरी नीलवर्णा नीलोत्पलविलोचना गंभीरनाभिस्त्रिवलीविभूषिततनूदरी १२ सु
कर्कशसमोत्तुंगवृत्तपीनघनस्तनी मुष्टिं शिलीमुखापूर्णां कमलं कमलालया १४
पुष्पपल्लवमूलादिफलाढ्यं शाकसंचयं काम्यानंतरसैर्युक्तं क्षुत्तृण्मृत्युजरापहं १५
कार्मुकं च स्फुरत्कांति बिभर्ति परमेश्वरी शाकंभरी शताक्षी सा सैव दुर्गा प्रकीर्तिता
उमा गौरी सती चंडी कालिका सा च पार्वती शाकंभरीं स्तुवं ध्यायन्जपन्संपूजयन्नमन् १७
अक्षय्यमश्नुते शीघ्रमन्नपानामृतं जलं भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा १८

विशाललोचनानारीहृत्तपीनपयोधरा वंदहाःसंचडमकं शिरःपाणौचविभ्रती १९ एक
वीराकालरात्रिःसैवोक्ताकामदास्तुता तेजोमंडलदुर्धर्षाभ्रामरीचित्रकांतिभृत् २० चित्रभ्र
मरसंकाशामहामारीतिगीयते इत्येतामूर्तयोदेव्यायाःख्यातावसुधाधिप २१ जगन्मातु
श्चंडिकायाःकीर्तिताःकामधेनवः इदंरहस्यंपरमंनवाच्यंकस्यचित्त्वया २२ व्याख्यानंदिव्यमू
र्तीनामधीष्वावहितःस्वयं एतस्यास्त्वप्रसादेनसर्वमान्योभविष्यति २३ सर्वरूपमयीदेवीस
र्वंदेवीमयंजगत् अतोहंविश्वरूपांत्वांनमामिपरमेश्वरीं २४ इतिमूर्तिरहस्यंसमाप्तम्

इं.
५८

ॐ इंद्राक्ष्यै भगवत्यै नमः ॐ अस्य श्री इंद्राक्षी स्तोत्र मंत्रस्य पुरंदर ऋषिः अनुष्टुप्छं
दः श्री इंद्राक्षी देवता ह्रीं बीजं भुवनेश्वरी शक्तिः भवानी कीलकं गायत्री सावित्री सर
स्वती कवचं सकलकामना सिद्ध्यर्थे पाठे विनियोगः ॐ लक्ष्म्यै अंगुष्ठाभ्यां नमः भुव
नेश्वर्यै तर्जनीभ्यां नमः माहेश्वर्यै मध्यमाभ्यां नमः वज्रहस्तायै अनामिकाभ्यां नमः
सहस्रनयनायै कनिष्ठिकाभ्यां नमः इंद्राक्ष्यै भगवत्यै करतलकरपृष्ठाभ्यां नमः इति कर
न्यासः अथ षडंगन्यासः ॐ लक्ष्म्यै हृदयाय नमः भुवनेश्वर्यै शिरसे स्वाहा माहेश्वर्यै
शिखायै वषट् वज्रहस्तायै कवचाय हुं सहस्रनयनायै नेत्रत्रयाय वौषट् इंद्राक्ष्यै भगवत्यै
अस्त्राय फट् अथ ध्यानं इंद्राक्षी द्विभुजां देवीं पीतवस्त्रद्वयांशुभां वामे वज्रधरां सव्या
हस्ते भयवरप्रदां। सहस्रनेत्रां सूर्याभां नानालंकारभूषितां प्रसन्नवदनां नित्यमप्स

रोगणसेविता २ श्रीदुर्गासौम्यवदनापाशांकुशधरांपरां त्रैलोक्यमोहिनींदेवींभ
वानींप्रणमाम्यहं ३ इंद्रउवाच इंद्राक्षीनामसादेवीदेवतासमुदाहृता गौरीशाकं
भरीदेवीदुर्गानाम्नेतिविश्रुता ४ कात्यायनीमहादेवीचंडघंटामहातपाः सावित्रीसा
चगायत्रीब्रह्माणीब्रह्मवादिनी ५ नारायणीभद्रकालीरुद्राणीकृष्णपिंगला अग्निज्वा
लारौद्रमुखीकालरात्रीतपस्विनी ६ मेघश्यामासहस्राक्षीविकटांगीजलोदरी महो
दरीमुक्तकेशीघोररूपामहाबला ७ अनंदाभद्रजानंदारोगहंत्रीशिवप्रिया शिवदू
तीकरालीचप्रत्यक्षपरमेश्वरी ८ इंद्राणीचेंद्ररूपाचइंद्रशक्तिपरायणा महिषा
सुरसंहंत्रीचामुंडागर्भदेवता ९ वाराहीनारसिंहीचभीमाभैरवनादिनी श्रुतिःस्मृ
तिर्धृतिर्मेधाविद्यालक्ष्मीसरस्वती १० अनंदविजयापर्णामानस्तोकापराजिता भवा
नीपार्वतीदुर्गाहैमवत्यंबिकाशिवा ११ एतैर्नामपदैर्दिव्यैःस्तुताशक्रेणधीमता आ

इं.
९०

युरारोग्यमैश्वर्यसुखसंपत्तिकारकं ज्वरापस्मारकुष्ठादितापज्वरनिवारणं शतमा
वर्तयेद्यस्तुमुच्यतेव्याधिबंधनात् १३ आवर्तयेत्सहस्रेण लभतेवांछितंफलं राजाव
श्यमवाप्नोतिसत्यमेवनसंशयः १४ लक्षमेकंजपेद्यस्तुसाक्षाद्देवीभविष्यति त्रिकालं
पठतेनित्यंधनंधान्यंचसंपदः १५ अर्धरात्रेपठेन्नित्यंमुच्यतेपापबंधनात् इंदंस्तोत्रमि
दंपुण्यंजपेत्तुफलवर्धने विनाशायनिरोगानामपमृत्युहरायच राज्यार्थीलभतेराज्यं
धनार्थीविपुलंधनं इच्छाकामंतुकामार्थीधर्मार्थीधर्ममक्षयं १८ विद्यार्थीलभतेवि
द्यांमोक्षार्थीपरमंपदं इंद्रेणकथितंस्तोत्रंसत्यमेवनसंशयः १९ इतिश्रीइंद्राक्षीस्तोत्रं
समाप्तम् ॥

सं. १९४८ क. व. ५ लिखितंमयासुखरामेण श्री १०८ श्रीराजासाहिबश्री
रामसिंहजीकेवास्ते ॥

60